हंसयुक्तविमानस्थे ब्रह्माणीरूपधारिणि।
कौशाम्भःक्षरिके देवि नारायणि नमोऽस्तु ते ॥१३॥
त्रिशूलचन्द्राहिधरे महावृषभवाहिनि।
माहेश्वरीस्वरूपेण नारायणि नमोऽस्तु ते ॥१४॥

हे नारायणि ! तिमी ब्रह्माणीको रूप धारण गरेर हंस जोतिएका विमानमा बस्ने र कुश-मिश्रित जल छर्केर कल्याण गर्ने तिमीलाई नमस्कार छ ॥१३॥ माहेश्वरी रूपले त्रिशूल, चन्द्रमा र सर्प धारण गर्ने तथा वृषभको पीठमा बस्ने हे नारायणी देवि ! तिमीलाई नमस्कार छ ॥१४॥

मयूरकुक्कुटवृते महाशक्तिधरेऽनघे।
कौमारीरूपसंस्थाने नारायणि नमोऽस्तु ते ॥१५॥
शङ्खचक्रगदाशार्ङ्गगृहीतपरमायुधे।
प्रसीद वैष्णवीरूपे नारायणि नमोऽस्तु ते ॥१६॥

मयूर र कालिजले घेरिइरहने र महाशक्ति धारण गर्ने कौमारीरूपधारिणी निष्पापे, हे नारायणि ! तिमीलाई नमस्कार छ ॥१५॥ शङ्ख, चक्र, गदा र शार्ङ्ग धनुषरूप आयुधहरू धारण गर्ने वैष्णवी शक्तिरूपा हे नारायणि ! तिमीलाई नमस्कार छ ॥१६॥

गृहीतोग्रमहाचक्रे दंष्ट्रोद्धृतवसुन्धरे ।
वराहरूपिणि शिवे नारायणि नमोऽस्तु ते ॥१७॥
नृसिंहरूपेणोग्रेण हन्तुं दैत्यान् कृतोद्यमे ।
त्रैलोक्यत्राणसहिते नारायणि नमोऽस्तु ते ॥१८॥

हातमा भयानक चक्र लिने, दाह्रामा पृथ्वी उचाल्ने वाराही रूप धारिणी कल्याणमयी हे नारायणि ! तिमीलाई नमस्कार छ ॥१७॥ भयंकर नृसिंहरूपले दैत्यहरूको वधका लागि उद्योग गर्ने र त्रिभुवनको रक्षामा संलग्न रहने हे नारायणि! तिमीलाई नमस्कार छ ॥१८॥

किरीटिनि महावज्रे सहस्रनयनोज्ज्वले ।
वृत्रप्राणहरे चैन्द्रि नारायणि नमोऽस्तु ते ॥१९॥
शिवदूतीस्वरूपेण हतदैत्यमहाबले ।
घोररूपे महारावे नारायणि नमोऽस्तु ते ॥२०॥

निधारमा किरीट र हातमा वज्र धारण गर्ने, हजार नेत्रले गर्दा उद्दीप्त देखिने तथा वृत्रासुरको प्राण हरण गर्ने भएकी इन्द्रशक्तिरूपा हे नारायणी देवी ! तिमीलाई नमस्कार छ ॥१९॥ शिवदूती रूपले दैत्यका महती सेनाको संहार गर्ने र विकट गर्जना गर्ने हे नारायणि ! तिमीलाई नमस्कार छ ॥२०॥

दंष्ट्राकरालवदने शिरोमालाविभूषणे।
चामुण्डे मुण्डमथने नारायणि नमोऽस्तु ते ॥२१॥
लक्ष्मि लज्जे महाविद्ये श्रद्धे पुष्टिस्वधे ध्रुवे।
महारात्रि महाऽविद्ये नारायणि नमोऽस्तु ते ॥२२॥

दाह्राले गर्दा विकराल मुख भएकी मुण्डमालाले विभूषित मुण्डमर्दिनी चामुण्डारूपा हे नारायणि ! तिमीलाई नमस्कार छ ॥२१॥ लक्ष्मी, लज्जा, महाविद्या, श्रद्धा, पुष्टि, स्वधा, ध्रुवा, महारात्रि तथा महाअविद्यारूपा हे नारायणि ! तिमीलाई नमस्कार छ ॥२२॥

मेधे सरस्वति वरे भूति बाभ्रवि तामसि।
नियते त्वं प्रसीदेशे नारायणि नमोऽस्तु ते ॥२३॥
सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते।
भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोऽस्तु ते ॥२४॥

मेधा, सरस्वती, वरा (श्रेष्ठा), भूति (ऐश्वर्यरूपा), बाभ्रवी (फुस्रो रंगकी वा पार्वती), तामसी (महाकाली), नियता (संयमपरायणा), ईशा (सबैकी अधीश्वरी) रूपिणी हे नारायणि ! तिमीलाई नमस्कार छ ॥२३॥ सर्वस्वरूपा ! सर्वेश्वरी तथा सबै प्रकारका शक्तिहरूले सम्पन्न दिव्यरूपा हे दुर्गे देवि ! सबै भयबाट हाम्रो रक्षा गर, तिमीलाई हाम्रो नमस्कार छ ॥२४॥

एतत् ते वदनं सौम्यं लोचनत्रयभूषितम् ।
पातु नः सर्वभीतिभ्यः कात्यायनि नमोऽस्तु ते ॥२५॥
ज्वालाकरालमत्युग्रमशेषाऽसुर- सूदनम् ।
त्रिशूलं पातु नो भीतेर्भद्रकालि नमोऽस्तु ते ॥२६॥

हे कात्यायनी ! यो तीन नेत्रले विभूषित तिम्रो सौम्य मुख सबै प्रकारका भयहरूबाट हाम्रो रक्षा गरोस् । तिमीलाई नमस्कार छ ॥२५॥ हे भद्रकाली ! ज्वालाले गर्दा विकराल प्रतीत हुने, भयंकर र समस्त असुरहरूको संहार गर्ने तिम्रो त्रिशूल हामीलाई भयबाट रक्षा गरोस् । तिमीलाई नमस्कार छ ॥२६॥

हिनस्ति दैत्यतेजांसि स्वनेनाऽऽपूर्य या जगत् ।
सा घण्टा पातु नो देवि पापेभ्योऽनः सुतानिव ॥२७॥
असुराऽसृग्वसापङ्कचर्चितस्ते करोज्ज्वलः ।
शुभाय खड्गो भवतु चण्डिके त्वां नता वयम् ॥२८॥

हे देवि ! आफ्नू ध्वनिले सम्पूर्ण जगत्लाई व्याप्त पारेर दैत्यको तेज नष्ट गरिदिने यो घण्टा हामीहरूको पाप, आमाले आफ्ना बालकको नजाती कामबाट रक्षा गरे झैं, रक्षा गरोस् ॥२७॥ हे चण्डिके ! तिम्रो हातमा सुशोभित खड्ग- जुन असुरहरूको बोसोले चर्चित छ- हाम्रो मङ्गल गरोस् । हामी तिमीलाई नमस्कार गर्दछौं ॥२८॥

रोगानशेषानपहंसि तुष्टा
रुष्टा तु कामान् सकलानभीष्टान् ।
त्वामाश्रितानां न विपन्नराणां
त्वामाश्रिता ह्याश्रयतां प्रयान्ति ।।२९।।

हे देवि! तिमी प्रसन्न भए सबै रोग नष्ट पारिदिन्छ्यौ, रिसाए सबै कामनाहरूको नाश पारिदिन्छ्यौ । जो तिम्रो शरणमा परिसकेका छन्, तीमाथि विपत्ति आउनै सक्तैन । तिम्रो शरणमा गएका मानिस पनि अर्कालाई शरण दिने हुन्छन् ।।२९।।

एतत्कृतं यत्कदनं त्वयाऽद्य
धर्मद्विषां देवि महासुराणाम् ।
रूपैरनेकैर्बहुधाऽऽत्ममूर्तिं
कृत्वाऽम्बिके तत् प्रकरोति कान्या ।।३०।।

हे देवि, अम्बिके! तिमीले आफ्नू शरीर अनेक भागमा विभक्त गरेर अनेक प्रकारका रूपहरूले जुन यस बखत धर्मद्रोही दैत्यहरूको संहार गरिदियौ, त्यस्तो काम अरू को गर्न सक्ला ! ।।३०।।

विद्यासु शास्त्रेषु विवेकदीपे-
ष्वाद्येषु वाक्येषु च का त्वदन्या ।
ममत्वगर्तेऽतिमहान्धकारे
विभ्रामयत्येतदतीव विश्वम् ॥३१॥

विद्याहरूमा, ज्ञान प्रकाशित गर्ने शास्त्रहरूमा र आदिवाक्य (वेद) मा तिमीबाहेक अरू कसको वर्णन छ र? फेरि तिमी - बाहेक अर्को कुन यस्तो शक्ति छ, जसले यस विश्वलाई अज्ञानमय घोर अन्धकारबाट ममतारूपी खाडलमा निरन्तर खसालिइरहेको होस् ॥३१॥

रक्षांसि यत्रोग्रविषाश्च नागा
यत्राऽरयो दस्युबलानि यत्र ।
दावानलो यत्र तथाऽब्धिमध्ये
तत्र स्थिता त्वं परिपासि विश्वम् ॥३२॥

जहाँ राक्षस, महाविषधर सर्प, जहाँ शत्रु, चोर, डाकू, डढेलो छ त्यहाँ र समुद्रका माझमा पनि साथै रहेर विश्वको रक्षा गर्दछ्यौ ॥३२॥

विश्वेश्वरि त्वं परिपासि विश्वं
विश्वात्मिका धारयसीति विश्वम्।
विश्वेशवन्द्या भवती भवन्ति
विश्वाऽऽश्रया ये त्वयि भक्तिनम्राः ॥३३॥

हे विश्वेश्वरि ! तिमी विश्वको पालन गर्ने र विश्वरूपा छौ, त्यसैले सबै विश्वलाई धारण गर्दछ्यौ। तिमी भगवान् विश्वनाथकी पनि वन्दनीया छौ, जो व्यक्ति भक्तिपूर्वक तिम्रो सामुन्ने मस्तक निहुराउँछन्, ती सम्पूर्ण विश्वलाई आश्रय दिन सक्ने हुन्छन् ॥३३॥

देवि प्रसीद परिपालय नोऽरिभीते-
र्नित्यं यथाऽ सुरवधादधुनैव सद्यः।
पापानि सर्वजगतां प्रशमं नयाऽऽशु
उत्पातपाकजनितांश्च महोपसर्गान् ॥३४॥

हे देवि ! प्रसन्न होऊ ! जसरी अहिले असुरहरूको वध गरेर तिमीले हाम्रो रक्षा गर्‍यौ, त्यसै गरी सदैव हामीलाई शत्रुहरूको भयबाट रक्षा गर। सम्पूर्ण जगत्को पाप नष्ट पार, उत्पात र पापको फलस्वरूप प्राप्त हुने महामारी आदि ठूला-ठूला उपद्रवहरू शीघ्र नष्ट पार ॥३४॥

प्रणतानां प्रसीद त्वं देवि विश्वार्तिहारिणि।
त्रैलोक्यवासिनामीड्ये लोकानां वरदा भव ॥३५॥

देव्युवाच ॥३६॥

वरदाऽहं सुरगणा वरं यन्मनसेच्छथ।
तं वृणुध्वं प्रयच्छामि जगतामुपकारकम् ॥३७॥

विश्वको पीडा हरण गर्ने हे देवि! हामी तिम्रो शरणमा छौं, प्रसन्न होऊ। त्रिलोक निवासीहरूकी पूजनीया हे परमेश्वरी ! सबैलाई वरदान देऊ ॥३५॥ देवी भन्दछिन् ॥३६॥ हे देवता हो ! म वर दिन तयार छु। तिमीहरूको मनमा जे इच्छा छ, त्यो वर माग। संसारको निम्ति उपकारक त्यो वर म अवश्य दिनेछु ॥३७॥

देवा ऊचुः ॥३८॥

सर्वाबाधाप्रशमनं त्रैलोक्यस्याऽखिलेश्वरि।
एवमेव त्वया कार्यमस्मद्वैरिविनाशनम् ॥३९॥

देव्युवाच ॥४०॥

वैवस्वतेऽन्तरे प्राप्ते अष्टाविंशतिमे युगे।
शुम्भो निशुम्भश्चैवाऽन्यावुत्पत्स्येते महासुरौ ॥४१॥

देवता भन्दछन्- ॥३८॥ हे सर्वेश्वरी! तिमी यसै प्रकार तीनै लोकका समस्त बाधा शान्त गर र हाम्रा शत्रुहरूको नाश गर्दै रहू॥३९॥ देवी भन्दछिन् ॥४०॥ हे देवता हो! वैवस्वत मन्वन्तरको अट्ठाइसौं युगमा शुम्भ र निशुम्भ दुइ दैत्य उत्पन्न हुनेछन् ॥४१॥

नन्दगोपगृहे जाता यशोदागर्भसम्भवा ।
ततस्तौ नाशयिष्यामि विन्ध्याचलनिवासिनी ॥४२॥
पुनरप्यतिरौद्रेण रूपेण पृथिवीतले ।
अवतीर्य हनिष्यामि वैप्रचित्ताँस्तु दानवान् ॥४३॥

अनि म नन्दगोपका घरमा उनकी पत्नी यशोदाको गर्भबाट अवतीर्ण भई विन्ध्याचलमा गएर बस्नेछु र उक्त दुवै असुरको नाश गर्नेछु ॥४२॥ अनि अत्यन्त भयंकर रूपले पृथ्वीमा अवतार लिई म वैप्रचित्त नामका दानवहरूको वध गर्नेछु ॥४३॥

भक्षयन्त्याश्च तानुग्रान् वैप्रचित्तान् महासुरान् ।
रक्ता दन्ता भविष्यन्ति दाडिमीकुसुमोपमाः ॥४४।
ततो मां देवताः स्वर्गे मर्त्यलोके च मानवाः ।
स्तुवन्तो व्याहरिष्यन्ति सततं रक्तदन्तिकाम् ॥४५॥

ती भयङ्कर महादैत्यहरूलाई भक्षण गर्दा मेरा दाँत अनारको फूल जस्तै राता हुनेछन् ॥४४॥ अनि स्वर्गमा देवता र मर्त्यलोकमा मनुष्यहरू पनि सदैव मेरो स्तुति गर्दै मलाई 'रक्तदन्तिका' भन्नेछन् ॥४५॥

भूयश्च शतवार्षिक्यामनावृष्ट्यामनम्भसि ।
मुनिभिः संस्तुता भूमौ सम्भविष्याम्ययोनिजा ॥४६॥
ततः शतेन नेत्राणां निरीक्षिष्यामि यन्मुनीन् ।
कीर्तयिष्यन्ति मनुजाः शताक्षीमिति मां ततः ॥४७॥

अनि फेरि जब पृथ्वीमा सय वर्ष पानी पर्नेछैन र पानीको अभाव हुनेछ, त्यस बखत मुनिहरूले स्तुति गरेपछि म पृथ्वीमा अयोनिजारूपमा प्रकट हुनेछु ॥४६॥ अनि सय नेत्रले मुनिगणलाई हेर्नेछु । अतः मनुष्य 'शताक्षी' नामले मेरो कीर्तन गर्नेछन् ॥४७॥

ततोऽहमखिलं लोकमात्मदेहसमुद्भवैः ।
भरिष्यामि सुराः शाकैरावृष्टेः प्राणधारकैः ॥४८॥
शाकम्भरीति विख्यातिं तदा यास्याम्यहं भुवि ।
तत्रैव च वधिष्यामि दुर्गमाख्यं महासुरम् ॥४९॥

हे देवताहरू हो ! त्यस बखत म आफ्नू शरीरबाट उत्पन्न शाकद्वारा संसारको भरण-पोषण गर्नेछु । जबसम्म पृथ्वीमा पानी पर्नेछैन, तबसम्म त्यै शाकले प्राणको रक्षा गर्नेछु तब ती प्राण धान्नेहरूले ॥४८॥ त्यस बखत पृथ्वीमा 'शाकम्भरी' नामले मेरो ख्याति गाउनेछन् र त्यसै अवतारमा म दुर्ग नामक महादैत्यको वध गर्नेछु तब॥४९॥

दुर्गा देवीति विख्यातं तन्मे नाम भविष्यति ।
पुनश्चाऽहं यदा भीमं रूपं कृत्वा हिमाचले ॥५०॥
रक्षांसि भक्षयिष्यामि मुनीनां त्राणकारणात् ।
तदा मां मुनयः सर्वे स्तोष्यन्त्यानम्रमूर्तयः ॥५१॥

त्यसले मेरो नाम 'दुर्गादेवी' को रूपमा प्रसिद्ध हुनेछ । फेरि म जब भीमारूप धारण गरेर मुनिहरूको रक्षाका निम्ति हिमालयमा बस्नेछु ॥५०॥ र राक्षसहरूको भक्षण गर्नेछु, त्यस बेला सबै मुनिहरू नतमस्तक भएर मेरो स्तुति गर्नेछन्–॥५१॥

भीमा देवीति विख्यातं तन्मे नाम भविष्यति ।
यदाऽऽरुणाख्यस्त्रैलोक्ये महाबाधां करिष्यति ॥५२॥
तदाऽहं भ्रामरं रूपं कृत्वाऽसंख्येयषट्पदम् ।
त्रैलोक्यस्य हितार्थाय वधिष्यामि महासुरम् ॥५३॥

अनि मेरो नाम 'भीमादेवी' को रूपमा विख्यात हुनेछ । त्यस वेला अरुण नामक दैत्य तीनै लोकमा उपद्रव गर्नेछ ॥५२॥ तब म तीनै लोकको हित गर्नका निम्ति छः खुट्टा हुने असंख्य भ्रमराहरूको रूप धारण गरेर त्यो दैत्यको वध गर्नेछु ॥५३॥

भ्रामरीति च मां लोकास्तदा स्तोष्यन्ति सर्वतः ।
इत्थं यदा यदा बाधा दानवोत्था भविष्यति ॥५४॥
तदा तदाऽवतीर्याऽहं करिष्याम्यरिसंक्षयम् ॥ॐ॥५५॥

॥ श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये देव्याः स्तुतिर्नामैकादशः॥११॥
उवाच ४, अर्धश्लोकः १, श्लोकाः ५०, एवम् ५५, एवमादितः ६३०॥

त्यो बेला सबै जना 'भ्रामरी' नामले मेरो स्तुति गर्नेछन् । त्यसै गरी जब-जब संसारमा दानवी बाधा उपस्थित होला, तब-तब अवतार लिएर म शत्रुहरूको संहार गर्नेछु ॥५४-५५॥

श्रीमार्कण्डेय पुराणमा सावर्णिक मन्वन्तरको कथा अन्तर्गत देवीमाहात्म्यमा देवीस्तुति नामक एघारौं अध्याय सकियो ॥११॥

अथ द्वादशोऽध्यायः

ध्यानम्–

ॐ विद्युद्दामसमप्रभां मृगपतिस्कन्धस्थितां भीषणां
कन्याभिः करवालखेटविलसद्धस्ताभिरासेविताम् ।
हस्तैश्चक्रगदासिखेटविशिखाँश्चापं गुणं तर्जनीं
बिभ्राणामनलात्मिकां शशिधरां दुर्गां त्रिनेत्रां भजे ॥

बिजुलीको चमक जस्तो प्रभा (चमक) भएकी, सिंहको काँधमा बसेकी अर्थात् चढेकी, देख्नै डरलाग्दी र तलवार-ढाल हातमा शोभिएका कन्याहरूले निरन्तर सेवा गरिएकी, आफ्ना हातहरूले चक्र-गदा-तरवार-ढाल-बाण (तीर) -धनु-पाश र तर्जनी मुद्रा लिएर शोभिएकी, अग्निमय दन्दनाउँदो स्वरूप भएकी, शिरमा अर्धचन्द्र धारण गरेकी, अनि तीन नेत्र भएकी दुर्गा देवीकन म ध्यान गर्दछु ॥

'ॐ' देव्युवाच ॥१॥

एभिः स्तवैश्च मां नित्यं स्तोष्यते यः समाहितः।
तस्याऽहं सकलां बाधां नाशयिष्याम्यसंशयम् ॥२॥
मधुकैटभनाशं च महिषासुरघातनम्।
कीर्तयिष्यन्ति ये तद्वद् वधं शुम्भनिशुम्भयोः ॥३॥

देवी भन्दछिन्- ॥१॥ हे देवताहो ! जो एकाग्र चित्त भएर प्रतिदिन यी स्तुतिहरूले मेरो स्तवन गर्नेछ, त्यसका सबै बाधा म अवश्य निवारण गरिदिनेछु ॥२॥ जुन मधु-कैटभको नाश, महिषासुरवध र शुम्भ-निशुम्भ संहारको प्रसङ्ग पाठ गर्नेछन् ॥३॥

अष्टम्यां च चतुर्दश्यां नवम्यां चैकचेतसः।
श्रोष्यन्ति चैव ये भक्त्या मम माहात्म्यमुत्तमम् ॥४॥
न तेषां दुष्कृतं किञ्चिद् दुष्कृतोत्था न चाऽऽपदः।
भविष्यति न दारिद्र्यं न चैवेष्टवियोजनम् ॥५॥

तथा जो अष्टमी, चतुर्दशी र नवमीमा पनि एकाग्रचित्तले भक्तिपूर्वक मेरो उत्तम माहात्म्य सुन्दछन् ॥४॥ तिनलाई कुनै पापले छुन सक्तैन, तीमाथि पापजनित आपत्ति पनि आउन्नन् । तिनको घरमा कहिल्यै दरिद्रता आउने छैन। तिनले कहिल्यै प्रेमीजनको वियोगरूपी कष्ट भोग्नुपर्नेछैन ॥५॥

शत्रुतो न भयं तस्य दस्युतो वा न राजतः।
न शस्त्रानलतोयौघात्कदाचित् सम्भविष्यति ॥६॥
तस्मान्ममैतन्माहात्म्यं पठितव्यं समाहितैः।
श्रोतव्यं च सदा भक्त्या परं स्वस्त्ययनं हि तत् ॥७॥

त्यति मात्र होइन, तिनलाई शत्रुबाट, चोर, डाका, राजा र शस्त्र, अग्नि र जलराशिबाट पनि कहिल्यै डर हुनेछैन ॥६॥ त्यसकारण, सबैले यो माहात्म्य भक्तिपूर्वक पढ्नू र सुन्नू, यो परम कल्याणकारक छ ॥७॥

उपसर्गानशेषाँस्तु महामारीसमुद्भवान्।
तथा त्रिविधमुत्पातं माहात्म्यं शमयेन्मम ॥८॥
यत्रैतत् पठ्यते सम्यङ्नित्यमायतने मम।
सदा न तद्विमोक्ष्यामि सांनिध्यं तत्र मे स्थितम् ॥९॥

यो मेरो माहात्म्य महामारीजनित समस्त उपद्रव र दैहिक, दैविक र भौतिक आदि तीनै थरिका उत्पात शान्त पार्ने छ ॥८॥ जुन मेरो मन्दिरमा प्रतिदिन विधिपूर्वक मेरो यो माहात्म्य पाठ गरिन्छ, त्यस ठाउँलाई म कहिल्यै छाड्दिनँ। त्यहाँ सदैव म निवास गर्नेछु ॥९॥

बलिप्रदाने पूजायामग्निकार्ये महोत्सवे ।
सर्वं ममैतच्चरितमुच्चार्यं श्राव्यमेव च ॥१०॥
जानताऽजानता वापि बलिपूजां तथा कृताम् ।
प्रतीच्छिष्याम्यहं प्रीत्या वह्निहोमं तथा कृतम् ॥११॥

बलिदान, पूजा, होम र महोत्सवको अवसरमा मेरो यस चरित्रको पाठ र श्रवण गर्नुपर्दछ ॥१०॥ यस्तो गरेपछि विधि जाने पनि नजाने पनि मेरो निम्ति जुन बलि, पूजा वा होम गरिन्छ, त्यो म प्रसन्नतापूर्वक ग्रहण गर्नेछु ॥११॥

शरत्काले महापूजा क्रियते या च वार्षिकी ।
तस्यां ममैतन्माहात्म्यं श्रुत्वा भक्तिसमन्वितः ॥१२॥
सर्वाबाधाविनिर्मुक्तो धनधान्यसुताऽन्वितः ।
मनुष्यो मत्प्रसादेन भविष्यति न संशयः ॥१३॥

शरत्कालमा जुन वार्षिक महापूजा गरिन्छ, त्यस अवसरमा जो मेरो माहात्म्य भक्तिपूर्वक सुन्दछ, त्यो व्यक्ति मेरो प्रसादले सबै बाधाबाट मुक्त तथा धन-धान्य र पुत्रले सम्पन्न हुनेछ, यसमा कुनै शंका छैन ॥१२॥१३॥

श्रुत्वा ममैतन्माहात्म्यं तथा चोत्पत्तयः शुभाः।
पराक्रमं च युद्धेषु जायते निर्भयः पुमान् ॥१४॥
रिपवः संक्षयं यान्ति कल्याणं चोपपद्यते।
नन्दते च कुलं पुंसां माहात्म्यं मम शृण्वताम् ॥१५॥

मेरो यो माहात्म्य, मेरो प्रादुर्भावका कथा र युद्धमा गरिएका पराक्रम सुन्नाले मनुष्य निर्भय हुनेछ ॥१४॥ मेरो यो माहात्म्य श्रवण गर्ने पुरुषका शत्रु नष्ट हुन्छन्, उनलाई कल्याण प्राप्त हुन्छ र तिनको कुल आनन्दित रहनेछ ॥१५॥

शान्तिकर्मणि सर्वत्र तथा दुःस्वप्नदर्शने।
ग्रहपीडासु चोग्रासु माहात्म्यं शृणुयान्मम ॥१६॥
उपसर्गाः शमं यान्ति ग्रहपीडाश्च दारुणाः।
दुःस्वप्नं च नृभिर्दृष्टं सुस्वप्नमुपजायते ॥१७॥

सर्वत्र शान्ति कर्ममा, नजाती स्वप्न देखेमा र ग्रहजनित पीडा उपस्थित भएमा मेरो माहात्म्य श्रवण गर्नुपर्दछ ॥१६॥ यसले सबै विघ्न र ग्रहपीडाहरू शान्त हुन्छन्, मनुष्यले देखेको दुःस्वप्न शुभ-स्वप्नमा परिवर्तित हुनेछ ॥१७॥

बालग्रहाभिभूतानां बालानां शान्तिकारकम् ।
संघातभेदे च नृणां मैत्रीकरणमुत्तमम् ॥१८॥
दुर्वृत्तानामशेषाणां बलहानिकरं परम् ।
रक्षोभूतपिशाचानां पठनादेव नाशनम् ॥१९॥

बालग्रहले पीडित बालकका निम्ति यो माहात्म्य शान्तिकारक छ तथा मनुष्यहरूका संगठनमा विरोध पर्‍यो भने यसले स्थिर मित्रता गराउँदछ ॥१८॥ मेरो यो माहात्म्य समस्त दुराचारीका बलको नाश गर्दछ, मेरो सामीप्य प्राप्ति गराउन सक्नेछ । यसको पाठमात्रले राक्षस - भूत-पिशाचको नाश हुनेछ ॥१९॥

सर्वं ममैतन्माहात्म्यं मम सन्निधिकारकम् ।
पशुपुष्पार्घ्यधूपैश्च गन्धदीपैस्तथोत्तमैः ॥२०॥
विप्राणां भोजनैर्होमैः प्रोक्षणीयैरहर्निशम् ।
अन्यैश्च विविधैर्भोगैः प्रदानैर्वत्सरेण या ॥२१॥

पशु,पुष्प,अर्घ्य,धूप-दीप, गन्धादि उत्तम सामग्रीद्वारा पूजा गर्नाले, ब्राह्मण भोजन गराउनाले, होम गर्नाले, प्रतिदिन अभिषेक गर्नाले, नाना प्रकारका नैवेद्य अर्पण गर्नाले र दानादि दिने गरेर जो एक वर्षसम्म मेरो आराधना गरिन्छ त ॥२०-२१॥

प्रीतिर्मे क्रियते साऽस्मिन् सकृत्सुचरिते श्रुते।
श्रुतं हरति पापानि तथाऽऽरोग्यं प्रयच्छति ॥२२॥
रक्षां करोति भूतेभ्यो जन्मनां कीर्तनं मम।
युद्धेषु चरितं यन्मे दुष्टदैत्यनिबर्हणम् ॥२३॥

त्यसले मलाई जति खुशी हुन्छ, त्यति खुशी मेरो यो उत्तम चरित्रको एकपल्ट श्रवण गर्नाले नै हुन्छ। यो माहात्म्य एकैपल्ट पनि श्रवण गर्नाले पाप नाश गरेर आरोग्य प्रदान गर्दछ ॥२२॥ मेरो प्रादुर्भावको कीर्त्तन समस्त भूतबाट रक्षा गर्दछ, मेरो युद्धविषयक-चरित्र सुन्नाले दुष्ट दैत्यको संहार गर्दछ ॥२३॥

तस्मिञ्छ्रुते वैरिकृतं भयं पुंसां न जायते।
युष्माभिः स्तुतयो याश्च याश्च ब्रह्मर्षिभिः कृताः ॥२४॥
ब्रह्मणा च कृतास्तास्तु प्रयच्छन्ति शुभां मतिम्।
अरण्ये प्रान्तरे वाऽपि दावाग्निपरिवारितः ॥२५॥

यसको श्रवण गरेपछि शत्रुको भय रहन्न। हे देवता हो ! तिमीहरूले र ब्रह्मर्षिहरूले जो मेरो स्तुति गर्‍यौ ॥२४॥ तथा ब्रह्माले जुन स्तुति गरे, ती सबै कल्याणमयी बुद्धि प्रदान गर्दछन्। वनमा, एकान्त बाटोमा वा दावानल(डढेलो)ले ढाकेमा ॥२५॥

दस्युभिर्वा वृतः शून्ये गृहीतो वापि शत्रुभिः ।
सिंहव्याघ्रानुयातो वा वने वा वनहस्तिभिः ॥२६॥
राज्ञा क्रुद्धेन चाऽऽज्ञप्तो वध्यो बन्धगतोऽपि वा ।
आघूर्णितो वा वातेन स्थितः पोते महार्णवे ॥२७॥

निर्जन स्थानमा, डाकाको घेरामा या शत्रुको फेला परेमा अथवा जंगलमा बाघ वा जंगली हात्तीले लखेटेमा ॥२६॥ रिसाएको राजाको आज्ञाले वध वा बन्धन (नेल ठोक्ने) को स्थानमा लैजाँदा वा महासागरमा डुङ्गामा बसेपछि ठूलो हुरीले डुङ्गा हल्लिएमा ॥२७॥

पतत्सु चाऽपि शस्त्रेषु संग्रामे भृशदारुणे ।
सर्वाबाधासु घोरासु वेदनाभ्यर्दितोऽपि वा ॥२८॥
स्मरन्ममैतच्चरितं नरो मुच्येत संकटात् ।
मम प्रभावात् सिंहाद्या दस्यवो वैरिणस्तथा ॥२९॥
दूरादेव पलायन्ते स्मरतश्चरितं मम ॥३०॥

डरलाग्दो युद्धमा शस्त्रप्रहार हुँदा अथवा वेदनाले पीडित हुँदा र सबै भयानक बाधाहरू उपस्थित हुँदा ॥२८॥ जो मेरो यो चरित्रको स्मरण गर्दछ, त्यो मनुष्य संकटबाट मुक्त हुन्छ । मेरो प्रभावले सिंह आदि हिंसक जन्तु पनि नष्ट हुन्छन् र डाका तथा शत्रु पनि मेरो चरित्र स्मरण गर्ने व्यक्तिदेखि परैबाट भाग्दछन् ॥२९-३०॥

ऋषिरुवाच ॥३१॥

इत्युक्त्वा सा भगवती चण्डिका चण्डविक्रमा॥३२॥

पश्यतामेव देवानां तत्रैवाऽन्तरधीयत।

तेऽपि देवा निरातङ्काः स्वाधिकारान् यथा पुरा॥३३॥

ऋषि भन्दछन् ॥३१॥ यति भनेर प्रचण्ड पराक्रम हुने ती भगवती चण्डिका ॥३२॥ सबै देवताले हेर्दाहेर्दै त्यहीं अन्तर्धान भइन् । अनि सबै देवता पनि शत्रु मारिनाले निर्भय भएर पहिले जस्तै ॥३३॥

यज्ञभागभुजः सर्वे चक्रुर्विनिहतारयः।

दैत्याश्च देव्या निहते शुम्भे देवरिपौ युधि॥३४॥

जगद्विध्वंसिनि तस्मिन् महोग्रेऽतुलविक्रमे।

निशुम्भे च महावीर्ये शेषाः पातालमाययुः॥३५॥

यज्ञभागको उपभोग गर्दै आफ्ना - आफ्ना अधिकारको पालन गर्न लागे । संसार नै विध्वंस पार्ने महाभयङ्कर देवशत्रु शुम्भ-निशुम्भ संग्राममा देवीद्वारा मारिएपछि शेष सबै दैत्य पाताल गए ॥३४-३५॥

एवं भगवती देवी सा नित्याऽपि पुनःपुनः।
सम्भूय कुरुते भूप जगतः परिपालनम् ॥३६॥
तयैतन्मोह्यते विश्वं सैव विश्वं प्रसूयते।
सा याचिता च विज्ञानं तुष्टा ऋद्धिं प्रयच्छति ॥३७॥

हे राजन् ! यसरी अम्बिका देवी नित्य भएर पनि बारम्बार प्रकट भएर जन्म लिंदै, उनै जगत्को रक्षा गर्नुहुन्छ र प्रार्थना गर्नाले सन्तुष्ट भई विज्ञान र समृद्धि प्रदान गर्दछिन् ॥३६-३७॥

व्याप्तं तयैतत्सकलं ब्रह्माण्डं मनुजेश्वर।
महाकाल्या महाकाले महामारीस्वरूपया ॥३८॥
सैव काले महामारी सैव सृष्टिर्भवत्यजा
स्थितिं करोति भूतानां सैव काले सनातनी ॥३९॥

हे राजन् ! महाप्रलयमा महामारीको स्वरूप धारण गर्ने ती महाकाली नै यो समस्त ब्रह्माण्डमा व्याप्त छिन् ॥३८॥ तिनै बेला-बेलामा महामारी हुन्छिन् र तिनै अजन्मा भएर पनि सृष्टिरूपमा प्रकट हुन्छिन् । ती सनातनी देवी नै समयानुसार समस्त जीवको रक्षा गर्दछिन् ॥३९॥

भवकाले नृणां सैव लक्ष्मीर्वृद्धिप्रदा गृहे।
सैवाऽभावे तथाऽलक्ष्मीर्विनाशायोपजायते ॥४०॥
स्तुता सम्पूजिता पुष्पैर्धूपगन्धादिभिस्तथा।
ददाति वित्तं पुत्राँश्च मतिं धर्मे गतिं शुभाम्ॐ ॥४१॥

श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये फलस्तुतिर्नाम द्वादशः ॥१२॥
उवाच २, अर्धश्लोकौ २, श्लोकाः ३७, एवम् ४१, एवमादितः ६७१॥

मनुष्यको अभ्युदय हुने वेलामा उनै लक्ष्मीको रूपमा स्थित भएर उन्नति दिन्छिन्, र अभावमा दरिद्रता बनेर विनाशको कारण हुन्छिन् ॥४०॥ फूल-धूप र गन्धादिले पूजन गरेर उनको स्तुति गर्नाले ती धन-पुत्र, धार्मिक बुद्धि र उत्तम गति दिन्छिन् ॥४१॥

श्रीमार्कण्डेय पुराणमा सावर्णिक मन्वन्तरको कथा अन्तर्गत देवीमाहात्म्यमा फलस्तुतिनामक बाह्रौं अध्याय सकियो ॥१२॥

अथ त्रयोदशोऽध्यायः

ध्यानम्—

ॐ बालार्कमण्डलाभासां
चतुर्बाहुं त्रिलोचनाम्।
पाशाङ्कुशवराभीती–
र्धारयन्तीं शिवां भजे॥

उदयकालको सूर्यको जस्तो कान्ति भएकी, चार हातले शोभिएकी, तीन आँखाले चम्किएकी, हातहरूले पाश-अंकुश-वर एवं अभयको मुद्रा लिइरहेकी यस्ती शिवा देवीकन म ध्यान गर्दछु ॥

'ॐ' ऋषिरुवाच ॥१॥

एतत्ते कथितं भूप देवीमाहात्म्यमुत्तमम् ।
एवंप्रभावा सा देवी ययेदं धार्यते जगत् ॥२॥

ऋषि भन्दछन् ॥१॥ हे राजन् ! यसरी मैले तिमीलाई देवीको उत्तम महात्म्य वर्णन गरेर सुनाएँ । जो यस जगत्लाई धारण गर्दछिन् ती देवीको यस्तै प्रभाव छ ॥२॥

विद्या तथैव क्रियते भगवद्विष्णुमायया ।
तया त्वमेष वैश्यश्च तथैवाऽन्ये विवेकिनः ॥३॥
मोह्यन्ते मोहिताश्चैव मोहमेष्यन्ति चाऽपरे ।
तामुपैहि महाराज शरणं परमेश्वरीम् ॥४॥

त्यस्तै उनै विद्या (ज्ञान) उत्पन्न गर्दछिन् । भगवान् विष्णुकी महामाया स्वरूपा ती देवीद्वारा नै तिमी, यो वैश्य र अन्यान्य विवेकी व्यक्ति पनि मोहित हुन्छन्, मोहित भएका छन् र पछि पनि मोहित हुनेछन् । हे महाराज ! तिमी उनै परमेश्वरीको शरणमा पर ॥३-४॥

आराधिता सैव नृणां भोगस्वर्गाऽपवर्गदा ॥५॥

मार्कण्डेय उवाच ॥६॥

इति तस्य वचः श्रुत्वा सुरथः स नराधिपः ॥७॥
प्रणिपत्य महाभागं तमृषिं शंसितव्रतम् ।
निर्विण्णोऽतिममत्वेन राज्याऽपहरणेन च ॥८॥

आराधना गरेपछि मनुष्यलाई भोग, स्वर्ग र मोक्ष प्रदान गर्दछिन् ॥५॥ अनि मार्कण्डेय भन्दछन् -॥६॥ मेधा ऋषिको यस्ता वचन सुनेर राजा सुरथले उत्तम व्रत पालन गर्ने ती महाभाग महर्षिलाई प्रणाम गरे । ती अत्यन्त ममत्व र राज्य हरणले साह्रै खिन्न भइसकेका थिए ॥७-८॥

जगाम सद्यस्तपसे स च वैश्यो महामुने ।
संदर्शनार्थमम्बाया नदीपुलिनसंस्थितः ॥९॥
स च वैश्यस्तपस्तेपे देवीसूक्तं परं जपन् ।
तौ तस्मिन् पुलिने देव्याः कृत्वा मूर्तिं महीमयीम् ॥१०॥

हे महामुने ! विरक्त भएर ती राजा तथा वैश्य तत्काल तपस्या गर्न हिंडे । ती जगदम्बाको दर्शन गर्न नदीतटमा बसेर तपस्या गर्न लागे ॥९॥ ती वैश्य देवीसूक्तको जप गर्दै तपस्यामा प्रवृत्त भए । दुवै नदी-तटमा देवीको माटोको मूर्ति बनाएर ॥१०॥

अर्हणां चक्रतुस्तस्याः पुष्पधूपाग्नितर्पणैः ।
निराहारौ यताहारौ तन्मनस्कौ समाहितौ ॥११॥
ददतुस्तौ बलिं चैव निजगात्रासृगुक्षितम् ।
एवं समाराधयतोस्त्रिभिर्वर्षैर्यतात्मनोः ॥१२॥

पुष्प-धूप र हवनादिद्वारा उनको आराधना गर्न लागे । तिनले पहिले बिस्तार -बिस्तार आहारा घटाए, अनि निराहार रहेर देवीमै चित्त लगाई उनको चिन्तन आरम्भ गरे ॥११॥ ती दुवैले आफ्नू शरीरको रक्तले प्रोक्षित बलिदान दिंदै तीन वर्षसम्म आराधना गर्दै रहे ॥१२॥

परितुष्टा जगद्धात्री प्रत्यक्षं प्राह चण्डिका ॥१३॥
देव्युवाच ॥१४॥
यत् प्रार्थ्यते त्वया भूप त्वया च कुलनन्दन ।
मत्तस्तत् प्राप्यतां सर्वं परितुष्टा ददामि तत् ॥१५॥

त्यसले प्रसन्न भएकी जगत्लाई धारण गर्ने चण्डिका देवीले प्रत्यक्ष दर्शन दिएर भनिन् –॥१३॥ देवी भन्दछिन् ॥१४॥ हे राजन् ! तथा आफ्नू कुल उज्ज्वल पार्ने वैश्य ! तिमीहरू जुन वस्तुको अभिलाषा राख्दछौ, त्यो मसित माग । म सन्तुष्ट छु, अतः जे मागे पनि दिनेछु ॥१५॥

मार्कण्डेय उवाच ॥१६॥

ततो वव्रे नृपो राज्यमविभ्रंश्यन्यजन्मनि ।
अत्रैव च निजं राज्यं हतशत्रुबलं बलात् ॥१७॥
सोऽपि वैश्यस्ततो ज्ञानं वव्रे निर्विण्णमानसः ।
ममेत्यहमिति प्राज्ञः सङ्गविच्युतिकारकम् ॥१८॥

मार्कण्डेय भन्दछन्- ॥१६॥ अनि राजाले अर्को जन्ममा नष्ट नहुने राज्य मागे तथा यस जन्ममा पनि शत्रुसेनालाई नष्ट पारेर आफ्नू राज्य फेरि प्राप्त गर्ने वरदान मागे ॥१७॥ वैश्यको चित्त संसारबाट विरक्त र खिन्न भइसकेकोले ती बुद्धिमान् थिए, अतः उनले माया र अहङ्काररूप आसक्तिको नाश गर्ने ज्ञान मागे ॥१८॥

देव्युवाच ॥१९॥

स्वल्पैरहोभिर्नृपते स्वं राज्यं प्राप्स्यते भवान् ॥२०॥
हत्वा रिपूनस्खलितं तव तत्र भविष्यति ॥२१॥
मृतश्च भूयः सम्प्राप्य जन्म देवाद्विवस्वतः ॥२२॥
सावर्णिको नाम मनुर्भवान् भुवि भविष्यति ॥२३॥

देवी भन्दछिन्- ॥१९॥ हे राजन् ! थोरै दिनमा तिमी चाँडै नै शत्रुलाई मारेर आफ्नू राज्य सबै प्राप्त गर्नेछौ, तब त्यहाँ तिम्रो राज्य स्थिर रहनेछ ॥२०-२१॥ अनि मृत्युपछि तिमी विवस्वान् (सूर्य) को अंशबाट जन्म लिएर यस पृथ्वीमा सावर्णिक मनुको नामले विख्यात हुनेछौ ॥२२-२३॥

वैश्यवर्य त्वया यश्च वरोऽस्मत्तोऽभिवाञ्छितः ।।२४।।
तं प्रयच्छामि संसिद्ध्यै तव ज्ञानं भविष्यति ।।२५।।

मार्कण्डेय उवाच ।।२६।।

हे वैश्यवर्य ! तिमीले पनि जुन वर मसित प्राप्त गर्ने इच्छा गरेका छौ, त्यही दिन्छु, तिमीलाई मोक्षको निम्ति ज्ञान प्राप्त हुनेछ ।।२४-२५।। मार्कण्डेयजी भन्दछन् ।।२६।।

इति दत्त्वा तयोर्देवी यथाऽभिलषितं वरम् ।।२७।।
बभूवाऽन्तर्हिता सद्यो भक्त्या ताभ्यामभिष्टुता ।
एवं देव्या वरं लब्ध्वा सुरथः क्षत्रियर्षभः ।।२८।।
सूर्याज्जन्म समासाद्य सावर्णिर्भविता मनुः ।।२९।।

यसरी ती दुवैलाई मनोवाञ्छित वरदान दिएर तथा उनीद्वारा भक्तिपूर्वक आफ्नू स्तुति सुनेर देवी अम्बिका अन्तर्धान भइन् । यसरी देवीबाट वरदान पाएर क्षत्रियहरूमा श्रेष्ठ सुरथ राजा सूर्यद्वारा जन्म लिई सावर्णिनामक मनु हुनेछन् ।।२७-२९।।

एवं देव्या वरं लब्ध्वा सुरथः क्षत्रियर्षभः।
सूर्याज्जन्म समासाद्य सावर्णिर्भविता मनुः।। क्लींॐ३०।।

श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये सुरथ-वैश्ययोर्वरप्रदानं नाम त्रयोदशः ।।१३।।

उवाच ६, अर्धश्लोकाः ११, श्लोकाः १२, एवम् २९, एवमादितः ७००।।

(समस्ता उवाचमन्त्राः ५७, अर्धश्लोकाः ४२, श्लोकाः ५३५, त्रिपान्मन्त्राः ६६)

यसरी देवीबाट वरदान पाएर क्षत्रियहरूमा श्रेष्ठ सुरथले सूर्यबाट जन्म पाएर सावार्णि नामका मनु हुनेछन् ।।३०।।

श्रीमार्कण्डेय पुराणमा सावर्णिक मन्वन्तरको कथा अन्तर्गत देवीमाहात्म्यमा सुरथ र वैश्यलाई वरदान नामक तेह्रौं अध्याय सकियो ।।१३।।

उत्तरन्यासाः

ऋष्यादिन्यासः- ॐ ब्रह्म - विष्णु - रुद्र - ऋषिभ्यो नमः-शिरसि । ॐ गायत्र्युष्णिगनुष्टुप् - छन्दोभ्यो नमः-मुखे । ॐ महाकाली - महालक्ष्मी-महासरस्वती देवताभ्यो नमः-हृदि। ॐ ऐं वीजाय नमः-गुह्ये । ॐ ह्रीं शक्तये नमः-पादयो : । ॐ क्लीं कीलकाय नमः–नाभौ । ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे- इति मूलेन करौ संशोध्य।।

करन्यासः - ॐ ऐं अङ्गुष्ठाभ्यां नमः । ॐ ह्रीं तर्जनीभ्यां नमः । ॐ क्लीं मध्यमाभ्यां नमः । ॐ चामुण्डायै अनामिकाभ्यां नमः । ॐ विच्चे कनिष्ठिकाभ्यां नमः । ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे करतलकरपृष्ठाभ्यां नमः ।।

हृदयादि न्यासः- ॐ ऐं हृदयाय नमः । ॐ ह्रीं शिरसे स्वाहा । ॐ क्लीं शिखायै वषट् । ॐ चामुण्डायै कवचाय हुम् । ॐ विच्चे नेत्रत्रयाय वौषट् ।

ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे अस्त्राय फट् ॥

अक्षरन्यासः - ॐ ऐं नमः– शिखायाम् । ॐ ह्रीं नमः –दक्षिणनेत्रे । ॐ क्लीं नमः –वामनेत्रे। ॐ चां नमः– दक्षिणकर्णे । ॐ मुं नमः–वामकर्णे । ॐ डां नमः–दक्षिणनासापुटे । ॐ यैं नमः-वामनासापुटे । ॐ विं नमः-मुखे । ॐ च्चें नमः–गुह्ये । एवं विन्यस्याऽष्टवारं मूलेन व्यापकं कुर्यात् ॥

दिङ्न्यासः - ॐ ऐं प्राच्यै नमः । ॐ ऐं आग्नेयै नमः । ॐ ह्रीं दक्षिणायै नमः । ॐ ह्रीं नैर्ऋत्यै नमः । ॐ क्लीं प्रतीच्यै नमः । ॐ क्लीं वायव्यै नमः । ॐ चामुण्डायै उदीच्यै नमः । ॐ चामुण्डायै ईशान्यै नमः । ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे-ऊर्ध्वायै नमः । ॐ ऐं ह्रीं क्लीं चामुण्डायै नमः भूम्यै नमः ॥

ध्यानम्-

खड्गं चक्रगदेषुचापपरिघाञ्छूलं भुशुण्डीं शिरः
शङ्खं संदधतीं करैस्त्रिनयनां सर्वाङ्गभूषाऽऽवृताम् ।
नीलाश्मद्युतिमास्यपाददशकां सेवे महाकालिकाम्
यामस्तौत् स्वपिते हरौ कमलजो हन्तुं मधुं कैटभम् ॥१॥
अक्षस्रक्परशुं गदेषुकुलिशं पद्मं धनुः कुण्डिकाम्
दण्डं शक्तिमसिं च चर्म जलजं घण्टां सुराभाजनम् ।
शूलं पाशसुदर्शने च दधतीं हस्तैः प्रवालप्रभां
सेवे सैरिभमर्दिनीमिह महालक्ष्मीं सरोजस्थिताम् ॥२॥
घण्टा-शूलहलानि शङ्खमुसले चक्रं धनुः सायकम्
हस्ताब्जैर्दधतीं घनान्तविलसच्छीतांशुतुल्यप्रभाम् ।

गौरीदेहसमुद्भवां त्रिजगतामाधारभूतां महा-
पूर्वामत्र सरस्वतीमनुभजे शुम्भादि–दैत्यार्दिनीम् ॥३॥

यस प्रकार न्यास- ध्यान गरिसकेपछि मानसिक उपचारले देवीको पूजन गर्नू। अनि २८ पल्ट वा १०८ नवार्णमन्त्रको जप गर्नू । जप थाल्नुभन्दा अगाडि 'ॐ ऐं ह्रीं अक्षमालिकायै नमः' यस मन्त्रले मालाको पूजा र तलको मन्त्रले प्रार्थना गर्नू -

ॐ मां माले महामाये सर्वशक्तिस्वरूपिणि ।
चतुर्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव ॥
ॐ अविघ्नं कुरु माले त्वं गृह्णामि दक्षिणे करे ।
जपकाले च सिद्ध्यर्थं प्रसीद मम सिद्धये ॥

ॐ अक्षमालाधिपतये सुसिद्धिं देहि देहि सर्वमन्त्रार्थसाधिनि साधय साधय सर्वसिद्धिं परिकल्पय परिकल्पय मे स्वाहा ॥

यसरी प्रार्थना गरिसकेपछि जप आरम्भ गर्नू । अनि पूजा गरेर त्यो देवीलाई समर्पित गरेर भन्नू -

गुह्यातिगुह्यगोप्त्री त्वं गृहाणाऽस्मत्कृतं जपम् ।
सिद्धिर्भवतु मे देवि त्वत्प्रसादान्महेश्वरि ॥

यसपछि करन्यास गर्नू-

ॐ ह्रीं अङ्गुष्ठाभ्यां नमः । ॐ चं तर्जनीभ्यां नमः । ॐ डिं मध्यमाभ्यां नमः। ॐ कां अनामिकाभ्यां नमः । ॐ यैं कनिष्ठिकाभ्यां नमः । ॐ ह्रीं चण्डिकायै करतलकरपृष्ठाभ्यां नमः ॥

हृदयादिन्यासः-ॐ खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा ।
शंखिनी चापिनी बाणभुशुण्डी परिघायुधा ।। ॐ हृदयाय०।।
ॐ शूलेन पाहि नो देवि पाहि खड्गेन चाम्बिके ।
घण्टास्वनेन नः पाहि चापज्यानिःस्वनेन च ।। ॐ शिरसे स्वाहा ।।
ॐ प्राच्यां रक्ष प्रतीच्यां च चण्डिके रक्ष दक्षिणे ।
भ्रामणेनाऽऽत्मशूलस्य उत्तरस्यां तथेश्वरि ।।ॐ शिखायै वषट् ।।
ॐ सौम्यानि यानि रूपाणि त्रैलोक्ये विचरन्ति ते ।
यानि चात्यर्थघोराणि तै रक्षास्माँस्तथा भुवम् ।। ॐ कवचाय हुम्।।
ॐ खड्गशूलगदादीनि यानि चास्त्राणि तेऽम्बिके ।
करपल्लवसङ्गीनि तैरस्मान् रक्ष सर्वतः ।। ॐ नेत्रत्रयाय वौषट् ।।
ॐ सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते ।
भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोऽस्तु ते ।। ॐ अस्त्राय फट् ।।

ध्यानम्-

ॐ विद्युद्दामसमप्रभां मृगपतिस्कन्धस्थितां भीषणां
कन्याभिः करवाल - खेटविलसद्धस्ताभिरा सेविताम् ।
हस्तैश्चक्रगदासिखेट - विशिखाँश्चापं गुणं तर्जनीं
विभ्राणामनलात्मिकां शशिधरां दुर्गां त्रिनेत्रां भजे ।।१।।

अथ ऋग्वेदोक्त देवीसूक्तम्-

ॐ अहमित्यष्टर्चस्य सूक्तस्य वागम्भृणी ऋषिः सच्चित्सुखात्मकः सर्वगतः परमात्मा देवता, द्वितीयाया ऋचो जगती, शिष्टानां त्रिष्टुप् छन्दः देवीमाहात्म्य पाठे विनियोगः ।।

ध्यानम्-

ॐ सिंहस्था शशिशेखरा मरकतप्रख्यैश्चतुर्भिर्भुजैः
शङ्खं चक्रधनुःशरांश्च दधती नेत्रैस्त्रिभिः शोभिता।
आमुक्ताङ्गदहार - कङ्कणरणत्काञ्चीरणन्नूपुरा
दुर्गा दुर्गतिहारिणी भवतु नो रत्नोल्लसत्कुण्डला ॥१॥

देवीजीको निराजन आरती

(शंख-घण्ट-ध्वनिपूर्वक)

जगजननी ! जय जय

भयहारिणि, भवतारिणि, भवभाविनि माता ।
तिमि नै सत्-चित्-सुखमय शुद्ध ब्रह्मस्वरूपा ॥
सत्य सनातन सुन्दर शिव सुर-रूपा (जगजननी०)

आदि अनादि अनामय अविचल अविनाशी ।
अमल अनन्त अगोचर अज आनन्दकि राशि ॥ (जगजननी०)
आदि अनादि अनामय अविचल अविनाशी ।
अमल अनन्त अगोचर अज आनन्दकि राशि ॥ (जगजननी०)
अविकारी, अघहारी, अकल, कलाधारी ।
कर्ता विधि, भर्ता हरि, हर हौ संहारी ॥ (जगजननी०)
तिमी नै विधिवधू, तिमी नै रमा, तिमी नै उमा, महामाया ।
मूल प्रकृति विद्या तिमि हौ, तिमी नै जननी, जाया॥ (जगजननी०)
तिमी नै राम कृष्ण हौ, तिमी नै सीता, व्रजरानी राधा।
तिमी नै कल्पद्रुम, तिमी नै हारिणि सब बाधा ॥ (जगजननी०)
दश विद्या, नव दुर्गा, नाना शास्त्रकरा ।
अष्टमातृका, योगिनि नव नव रूपधरा ॥ (जगजननी०)
तिमी नै परमधाम-निवासिनि, अनि हौ महाविलासिनि ।
तिमी हौ मसानविहारिणि, अनि हौ ताण्डव - लासिनि (जगजननी०)

सुर-मुनि-मोहिनि सौम्या तिमी नै शोभाधारा ।
विवसन विकट-सरूपा, तिमि नै प्रलयकी मारा ।। (जगजननी०)
तिमी नै स्नेह-सुधामयि हौ तिमि नै हौ उत्कट विषखाना ।
रत्नविभूषित हौ तिमि नै तिमी नै धाछ्यौं मुण्डमाला ।। (जगजननी०)
मूलाधारनिवासिनि तिमि हौ, तिमि नै हौ सिद्धिप्रदे ।
कालाऽतीता काली, कमला अनि वरदे ।। (जगजननी०)
शक्ति शक्तिधर सब तिमि नै हौ, नित्य अभेदमयी ।
भेद-प्रदर्शिनि वाणी विमले, तिमि नै हौ वेदत्रयी ।। (जगजननी०)
हामी अति दीन दुखी छौं माता ! विपत-जालको घेरा ।
छौं कपूत अनि कपटी, तर हौं बालक तेरा ।। (जगजननी०)
निज स्वभाववश जननी ! दयादृष्टिले हेर्नोस् ।
करुणा गर हे करुणामयि, चरण-शरण दिनुहोस् । (जगजननी०)

श्रीदुर्गामानस-पूजा

उद्यच्चन्दनकुङ्कुमारुणपयोधाराभिराप्लावितां
नानानर्घ्यमणिप्रवालघटितां दत्तां गृहाणाम्बिके ।
आमृष्टां सुरसुन्दरीभिरभितो हस्ताम्बुजैर्भक्तितो
मातः सुन्दरि भक्तकल्पलतिके श्रीपादुकामादरात् ।।१।।

देवेन्द्रादिभिरर्चितं सुरगणैरादाय सिंहासनं
चञ्चत्काञ्चनसंचयाभिरचितं चारुप्रभाभास्वरम् ।
एतच्चम्पककेतकीपरिमलं तैलं महानिर्मलं
गन्धोद्वर्तनमादरेण तरुणीदत्तं गृहाणाम्बिके ।।२।।

पश्चाद्देवि गृहाण शम्भुगृहिणि श्रीसुन्दरि प्रायशो
गन्धद्रव्यसमूहनिर्भरतरं धात्रीफलं निर्मलम् ।
तत्केशान् परिशोध्य कङ्कतिकया मन्दाकिनीस्रोतसि
स्नात्वा प्रोज्ज्वलगन्धकं भवतु हे श्रीसुन्दरि त्वन्मुदे ।।३।।

सुराधिपतिकामिनीकरसरोजनालीधृतां
सचन्दनसकुङ्कुमागरुभरेण विभ्राजिताम् ।
महापरिमलोज्ज्वलां सरसशुद्धकस्तूरिकां
गृहाण वरदायिनि त्रिपुरसुन्दरि श्रीप्रदे ॥४॥

गन्धर्वामरकिन्नरप्रियतमासंतानहस्ताम्बुज-
प्रस्तारैर्ध्रियमाणमुत्तमतरं काश्मीरजापिञ्जरम् ।
मातर्भास्वरभानुमण्डललसत्कान्तिप्रदानोज्ज्वलं
चैतन्निर्मलमातनोतु वसनं श्रीसुन्दरि त्वन्मुदम् ॥५॥

स्वर्णाकल्पितकुण्डले श्रुतियुगे हस्ताम्बुजे मुद्रिका
मध्ये सारसना नितम्बफलके मञ्जीरमङ्घ्रिद्वये ।
हारो वक्षसि कङ्कणौ क्वणरणत्कारौ करद्वन्द्वके
विन्यस्तं मुकुटं शिरस्यनुदिनं दत्तोन्मदं स्तूयताम् ॥६॥

ग्रीवायां धृतकान्तिकान्तपटलं ग्रैवेयकं सुन्दरं
सिन्दूरं विलसल्ललाटफलके सौन्दर्यमुद्राधरम् ।
राजत्कज्जलमुज्ज्वलोत्पलदलश्रीमोचने लोचने
तद्दिव्यौषधिनिर्मितं रचयतु श्रीशाम्भवि श्रीप्रदे ॥७॥

अमन्दतरमन्दरोन्मथितदुग्धसिन्धूद्भवं
निशाकरकरोपमं त्रिपुरसुन्दरि श्रीप्रदे ।
गृहाण मुखमीक्षितुं मुकुरबिम्बमाविद्रुमै-
र्विनिर्मितमघच्छिदे रतिकराम्बुजस्थायिनम् ॥८॥

कस्तूरीद्रवचन्दनागरुसुधाधाराभिराप्लावितं
चञ्चच्चम्पकपाटलादिसुरभिद्रव्यैः सुगन्धीकृतम् ।
देवस्त्रीगणमस्तकस्थितमहारत्नादिकुम्भव्रजै-
रम्भः शाम्भवि संभ्रमेण विमलं दत्तं गृहाणाम्बिके ॥९॥

कह्लारोत्पलनागकेसरसरोजाख्यावलीमालती-
मल्लीकैरवकेतकादिकुसुमै रक्ताश्वमारादिभिः ।
पुष्पैर्माल्यभरेण वै सुरभिणा नानारसस्रोतसा
ताम्राम्भोजनिवासिनीं भगवतीं श्रीचण्डिकां पूजये ।।१०।।

मांसीगुग्गुलचन्दनागरुरजः कर्पूरशैलेयजै-
र्माध्वीकैः सह कुङ्कुमैः सुरचितैः सर्पिर्भिरामिश्रितैः ।
सौरभ्यस्थितिमन्दिरे मणिमये पात्रे भवेत् प्रीतये
धूपोऽयं सुरकामिनीविरचितः श्रीचण्डिके त्वन्मुदे ।।११।।

धृतद्रवपरिस्फुरद्रुचिररत्नयष्ट्यान्वितो
महातिमिरनाशनः सुरनितम्बिनीनिर्मितः ।
सुवर्णचषकस्थितः सघनसारवर्त्यान्वित-
स्तव त्रिपुरसुन्दरि स्फुरति देवि दीपो मुदे ।।१२।।

जातीसौरभनिर्भरं रुचिकरं शाल्योदकं निर्मलं
युक्तं हिङ्गुमरीचजीरसुरभिद्रव्यान्वितैर्व्यञ्जनैः ।
पक्वान्नेन सपायसेन मधुना दध्याज्यसम्मिश्रितं
नैवेद्यं सुरकामिनीविरचितं श्रीचण्डिके त्वन्मुदे ।।१३।।

लवङ्गकलिकोज्ज्वलं बहुलनागवल्लीदलं
सजातिफलकोमलं सघनसारपूगीफलम् ।
सुधामधुरिमाकुलं रुचिररत्नपात्रस्थितं
गृहाण मुखपङ्कजे स्फुरितमम्ब ताम्बूलकम् ।।१४।।

शरत्प्रभवचन्द्रमः स्फुरितचन्द्रिकासुन्दरं
गलत्सुरतरङ्गिणीललितमौक्तिकाडम्बरम् ।
गृहाण नवकाञ्चनप्रभवदण्डखण्डोज्ज्वलं
महात्रिपुरसुन्दरि प्रकटमातपत्रं महत् ।।१५।।

मातस्त्वन्मुदमातनोतु सुभगस्त्रीभिः सदाऽऽन्दोलितं
शुभ्रं चामरमिन्दुकुन्दसदृशं प्रस्वेददुःखापहम् ।
सद्योऽगस्त्यवसिष्ठनारदशुकव्यासादिवाल्मीकिभिः
स्वे चित्ते क्रियमाण एव कुरुतां शर्माणि वेदध्वनिः ॥१६॥

स्वर्गाङ्गणेवेणुमृदङ्गशङ्ख-भेरीनिनादैरुपगीयमाना ।
कोलाहलैराकलिता तवाऽस्तु विद्याधरीनृत्यकलासुखाय ॥१७॥

देवि भक्ति रसभावितवृत्ते, प्रीयतां यदि कुतोऽपि लभ्यते ।
तत्र लौल्यमपि सत्फलमेकं, जन्मकोटिभिरपीह नलभ्यम् ॥१८॥

एतैः षोडशभिः पद्यैरुपचारोपकल्पितैः ।
यः परां देवतां स्तौति स तेषां फलमाप्नुयात् ॥१९॥

देवी - पुष्पाञ्जलिः

अञ्जलौ पुष्पाणि आदाय-

अयि गिरिनन्दिनि नन्दितमेदिनि विश्वविनोदिनि नन्दिनुते
गिरिवरविन्ध्य-शिरोधिनिवासिनि विष्णुविलासिनि जिष्णुनुते ।
भगवति हे शितिकण्ठकुटुम्बिनि भूरिकुटुम्बिनि भूतिकृते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥१॥

सुरवरवर्षिणि दुर्धरधर्षिणि दुर्मुखमर्षिणि हर्षरते
त्रिभुवनपोषिणि शङ्करतोषिणि कल्मषमोषिणि घोषरते ।
दनुजनिरोषिणि दुर्मदशोषिणि दुर्मुनिरोषिणिसिन्धुसुते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥२॥

अयि जगदम्ब-कदम्ब-वनप्रियवासिनि तोषिणि हासरते
शिखरि-शिरोमणि-तुङ्ग-हिमालयशृङ्गनिजालयमध्यगते ।
मधुमधुरे मधुकैटभगञ्जिनि महिषविदारिणि रासरते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥३॥

अयि निजहुंकृति-मात्रनिराकृत-धूम्रविलोचन- धूम्रशते
समरविशोषित-रोषितशोणित-बीजसमुद्भव- बीजलते ।
शिव-शिव-शुम्भ-निशुम्भ-महाहव-तर्पित-भूतपिशाचरते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥४॥

अयि शतखण्ड-विखण्डित-रुण्डवितुण्डित-शुण्डगजाधिपते
निजभुज - दण्डनिपातित - चण्डविपाटित-मुण्डभटाधिपते ।
रिपुगजगण्ड - विदारण - चण्डपराक्रम - शौण्डमृगाधिपते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥५॥

धनुरनुषङ्ग-रणक्षणसङ्ग-परिस्फुरदङ्ग-नटत्कटके
कनकपिशङ्ग-पृषत्कनिषङ्ग-रसद्भटशृङ्ग-हताबटुके ।
हतचतुरङ्गबल-क्षितिरङ्गघटद्-बहुरङ्गरटद्-बटुके
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥६॥

अयि रणदुर्मद-शत्रुवधाद्धुर-दुर्धर-निर्भर-शक्तिभृते
चतुरविचारधुरीण-महाशयदूतकृत-प्रमथाधिपते ।
दुरित-दुरीह-दुराशय-दुर्मति-दानवदूत-दुरन्तगते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥७॥

अयि शरणागत-वैरिवधूजन-वीरवराभयदायिकरे
त्रिभुवनमस्तक-शूलविरोधि-शिरोधिकृतामल-शूलकरे ।
दुमिदुमितामर-दुन्दुभिनाद-मुहुर्मुखरीकृत-दिङ्निकरे
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥८॥

सुरललना-ततथेयित-थेयित-थाभिनयोत्तर-नृत्यरते
कृतकुकुथा-कुकुथोदि-डदाडिक-तालकुतूहल-गानरते ।
धुधुकुट-धूधुट-धिन्धिमितध्वनि-धीरमृदङ्ग-निनादरते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥९॥

जय जय जाप्यजये जयशब्द-परस्तुतितत्पर-विश्वनुते
झण-झण-झिंझिम-झिंकृत-नूपुरशिञ्जित-मोहित-भूतपते ।
नटितनदार्ध - नटीनटनायक -नाटननाटित-नाट्यरते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥१०॥

अयि सुमनः-सुमनः-सुमनः-सुमनः-सुमनोरमकान्तियुते
श्रितरजनी -रजनी-रजनी-रजनी-रजनीकर-वक्त्रभृते ।
सुनयन - विभ्रमर - भ्रमर - भ्रमर - भ्रमराभिदृते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥११॥

महित-महाहव-मल्लमतल्लिक-वल्लित-रल्लित-भल्लिरते
विरचित-वल्लिकपलिक-पल्लिक-झिल्लिक-भिल्लिकवर्गवृते ।
श्रुतकृत-फुल्ल-समुल्लसितारुण-तल्लजपल्लव-सल्ललिते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥१२॥

अयि सुदतीजन- लालसमानस-मोहन-मन्मथराजसुते
अविरल-गण्डगलन्-मदमेदुर- मत्तमतङ्गजराजगते ।
त्रिभुवन-भूषणभूत-कलानिधिरूप-पयोनिधिराजसुते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥१३॥

कमलदलामल- कोमलकान्ति-कलाकलितामल-भालतले
सकल- विलासकलानिलय- क्रमकेलि-चलत्कल-हंसकुले ।
अलिकुल-सङ्कुल-कुन्तलमण्डल-मौलिमिलद्-बकुलालिकुले
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥१४॥

करमुरलीरव-वर्जित-कूजित-लज्जित-कोकिलमञ्जुमते
मिलितमिलिन्द-मनोहरगुञ्जित-रञ्जित-शैलनिकुञ्जगते ।
निजगण- भूतमहाशबरीगण- *रङ्गणसम्भृत-केलिरते*
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥१५॥

कटितटपीत-दुकूलविचित्र- मयूखतिरस्कृत-चण्डरुचे
जितकनकाचल-मौलिमदोर्जित-गर्जित-कुञ्जरकुम्भकुचे ।
प्रणत-सुराऽसुर-मौलिमणि-स्फुरदंशु-लसन्नखचन्द्ररुचे
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥१६॥

विजित-सहस्रकरैक- सहस्रकरैक-सहस्रकरैकनुते
कृतसुरतारक-सङ्गरतारक-सङ्गरतारक-सूनुनुते ।
सुरथ-समाधि-समानसमाधि-समानसमाधि-सुजाप्यरते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥१७॥

पदकमलं करुणानिलये वरिवस्यति योऽनुदिनं सुशिवे
अयि कमले कमलानिलये कमलानिलयः स कथं न भवेत् ।
तव पदमेव परं पदमस्त्विति शीलयतो मम किं न शिवे
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥१८॥

कनकलसत्-कलशीकजलैरनुषिञ्चति तेऽङ्गणरङ्गभुवम्
भजति स किं न शचीकुचकुम्भ-नटीपरिरम्भ-सुखानुभवम् ।

तव चरणं शरणं करवाणि सुवाणि पथं मम देहिशिवम्
जय जय हे महिषासुरमर्दिनि रम्यकर्दिनि शैलसुते ॥१९॥

तव विमलेन्दुकलं वदनेन्दुमलं कलयन्ननुकूलयते
किमु पुरुहूतपुरीन्दुमुखीसुमुखीभिरसौ विमुखीक्रियते ।
मम तु मतं शिवमानधने भवती कृपया किमु न क्रियते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥२०॥

अयि मयि दीनदयालुतया कृपयैव त्वयाभवितव्यमुमे
अयि जगतो जननीति यथाऽसि मयाऽसि तथाऽनुमतासि रमे ।
यदुचितमत्र भवत्पुरगं कुरु शाम्भवि देवि दयां कुरु मे
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥२१॥

स्तुतिमिमां स्तिमितः सुसमाधिना, नियमतो यमतोऽनुदिनं पठेत् ।
परमया रमया स निषेव्यते, परिजनोऽरिजनोऽपि च तं भजेत् ॥२२॥

॥ श्रीदुर्गादेव्यै समर्पितमस्तु ॥

अथ देव्यपराधक्षमापनस्तोत्रम्

न मन्त्रं नो यन्त्रं तदपि च न जाने स्तुतिमहो !
न चाऽऽह्वानं ध्यानं तदपि च न जाने स्तुतिकथाः ।
न जाने मुद्रास्ते तदपि च न जाने विलपनं
परं जाने मातस्त्वदनुसरणं क्लेशहरणम् ॥१॥

विधेरज्ञानेन द्रविणविरहेणालसतया
विधेयाशक्यत्वात्तव चरणयोर्या च्युतिरभूत् ।
तदेतत् क्षन्तव्यं जननि सकलोद्धारिणि शिवे
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ॥२॥

पृथिव्यां पुत्रास्ते जननि बहवः सन्ति सरलाः
परं तेषां मध्ये विरलतरलोऽहं तव सुतः ।
मदीयोऽयं त्यागः समुचितमिदं नो तव शिवे
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ॥३॥

जगन्मातर्मातस्तव चरणसेवा न रचिता
न वा दत्तं देवि द्रविणमपि भूयस्तव मया ।
तथापि त्वं स्नेहं मयि निरुपमं यत्प्रकुरुषे
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ॥४॥

परित्यक्ता देवा विविधविधसेवाकुलतया
मया पञ्चाशीतेरधिकमपनीते तु वयसि ।
इदानीं चेन्मातस्तव यदि कृपा नापि भविता
निरालम्बो लम्बोदरजननि कं यामि शरणम् ॥५॥

श्वपाको जल्पाको भवति मधुपाकोपमगिरा
निरातङ्को रङ्को विहरति चिरं कोटिकनकैः ।
तवापर्णे कर्णे विशति मनुवर्णे फलमिदं
जनः को जानीते जननि जपनीयं जपविधौ ॥६॥

चिताभस्मालेपो गरलमशनं दिक्पटधरो
जटाधारी कण्ठे भुजगपतिहारी पशुपतिः ।
कपाली भूतेशो भजति जगदीशैकपदवीं
भवानि त्वत्पाणिग्रहणपरिपाटीफलमिदम् ॥७॥

न मोक्षस्याकाङ्क्षा भवविभववाञ्छापि च न मे
न विज्ञानापेक्षा शशिमुखि सुखेच्छापि न पुनः ।
अतस्त्वां संयाचे जननि जननं यातु मम वै
मृडानी रुद्राणी शिव शिव भवानीति जपतः ॥८॥

नाराधितासि विधिना विविधोपचारैः
किं रुक्षचिन्तनपरैर्न कृतं वचोभिः ।
श्यामे त्वमेव यदि किञ्चन मय्यनाथे
धत्से कृपामुचितमम्ब परं तवैव ॥९॥

आपत्सु मग्नः स्मरणं त्वदीयं
करोमि दुर्गे करुणार्णवेशि ।
नैतच्छठत्वं मम भावयेथाः
क्षुधातृषार्ता जननीं स्मरन्ति ॥१०॥

जगदम्ब विचित्रमत्र किं
परिपूर्णा करुणाऽस्ति चेन्मयि ।
अपराध — परम्पराऽपरं
न हि माता समुपेक्षते सुतम् ॥११॥

मत्समः पातकी नास्ति, पापघ्नी त्वत्समा न हि ।
एवं ज्ञात्वा महादेवि यथायोग्यं तथा कुरु ॥१२॥

क्षमा-प्रार्थना

अपराधसहस्राणि क्रियन्तेऽहर्निशं मया।
दासोऽयमिति मां मत्वा क्षमस्व परमेश्वरि ॥१॥
आवाहनं न जानामि न जानामि विसर्जनम्।
पूजां चैव न जानामि क्षम्यतां परमेश्वरि ॥२॥
मन्त्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वरि।
यत्पूजितं मया देवि परिपूर्णं तदस्तु मे ॥३॥

अपराधशतं कृत्वा जगदम्बेति चोच्चरेत्।
यां गतिं समवाप्नोति न तां ब्रह्मादयः सुराः ॥४॥
सापराधोऽस्मि शरणं प्राप्तस्त्वां जगदम्बिके।
इदानीमनुकम्प्योऽहं यथेच्छसि तथा कुरु ॥५॥
अज्ञानाद्विस्मृतेर्भ्रान्त्या यन्न्यूनमधिकं कृतम्।
तत्सर्वं क्षम्यतां देवि प्रसीद परमेश्वरि ॥६॥

कामेश्वरि जगन्मातः सच्चिदानन्दविग्रहे ।
गृहाणाऽर्चामिमां प्रीत्या प्रसीद परमेश्वरि ॥७॥
गुह्यातिगुह्यगोप्त्री त्वं गृहाणाऽस्मत्कृतं जपम् ।
सिद्धिर्भवतु मे देवि त्वत्प्रसादात् सुरेश्वरि ॥८॥

॥श्रीदुर्गार्पणमस्तु॥

॥ अब नवमीको होम कार्य बाहेक अरूको पाठ नगरे पनि हुन्छ ॥

अथ तन्त्रोक्तं देवीसूक्तम्

नमो देव्यै महादेव्यै शिवायै सततं नमः ।
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम् ॥१॥
रौद्रायै नमो नित्यायै गौर्यै धात्र्यै नमो नमः ।
ज्योत्स्नायै चेन्दुरूपिण्यै सुखायै सततं नमः ॥२॥

देवीलाई नमस्कार छ, महादेवी शिवालाई नमस्कार छ । प्रकृति र भद्रालाई प्रणाम छ । हामीहरू नियमपूर्वक जगदम्बालाई नमस्कार गर्दछौं ॥१॥ रौद्रालाई नमस्कार, नित्या, गौरी र धात्रीलाई बारम्बार नमस्कार छ । ज्योत्स्नामयी, चेन्द्ररूपिणी एवं सुखस्वरूपा देवीलाई नमस्कार छ ॥२॥

कल्याण्यै प्रणतां वृद्ध्यै सिद्ध्यै कुर्म्यै नमोनमः।
नैर्ऋत्यै भूभृतां लक्ष्म्यै शर्वाण्यै ते नमो नमः ॥३॥
दुर्गायै दुर्गपारायै सारायै सर्वकारिण्यै।
ख्यात्यै तथैव कृष्णायै धूम्रायै सततं नमः ॥४॥
अतिसौम्यातिरौद्रायै नतास्तस्यै नमो नमः।
नमो जगत्प्रतिष्ठायै देव्यै कृत्यै नमो नमः ॥५॥

शरणागतलाई कल्याण गर्ने वृद्धि र सिद्धिरूपा देवीलाई नमस्कार नैर्ऋती (राक्षसहरूकी लक्ष्मी), राजाहरूकी लक्ष्मी, शर्वाणी (शिवपत्नी) स्वरूपा जगदम्बालाई नमस्कार छ ॥३॥ दुर्गा, दुर्गपारा, सारा (सबैकी सारभूता), सर्वकारिणी, ख्याति, कृष्णा र धूम्रा देवीलाई नमस्कार छ ॥४॥ अत्यन्त सौम्य तथा अत्यन्त रौद्ररूपा देवीलाई हाम्रो नम्रतापूर्वक नमस्कार छ । जगत्की आधारभूता कृति देवीलाई बरम्बार नमस्कार छ ॥५॥

या देवी सर्वभूतेषु विष्णुमायेति शब्दिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥६॥
या देवी सर्वभूतेषु चेतनेत्यभिधीयते।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥७॥
या देवी सर्वभूतेषु बुद्धिरूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥८॥

जुन देवी सबै प्राणीहरूमा विष्णुमाया नामले कहिन्छिन्, उनलाई नमस्कार नमस्कार उनलाई नमस्कार ॥६॥ जो देवी सबै प्राणीमा चेतना कहिन्छिन् उनलाई नमस्कार छ, नमस्कार, नमस्कार नमस्कार छ ॥७॥जो देवी सबै प्राणीहरूमा बुद्धिरूपले स्थित छन्, उनलाई बारम्बार नमस्कार छ ॥८॥

या देवी सर्वभूतेषु निद्रारूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥९॥
या देवी सर्वभूतेषु क्षुधारूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१०॥
या देवी सर्वभूतेषुच्छायारूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥११॥

जो देवी सबै प्राणीहरूमा निद्रारूपले स्थित छन्, उनलाई नमस्कार छ ॥९॥ जो देवी सबै प्राणीहरूमा क्षुधारूपले स्थित छिन्, उनलाई नमस्कार, नमस्कार, नमस्कार छ (३)॥१०॥ जुन देवी सबै प्राणीहरूमा छायारूपले स्थित छिन्, उनलाई नमस्कार, नमस्कार छ बारम्बार नमस्कार ॥११॥

या देवी सर्वभूतेषु शक्तिरूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१२॥
या देवी सर्वभूतेषु तृष्णारूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१३॥
या देवी सर्वभूतेषु क्षान्तिरूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१४॥

जुन देवी सबै प्राणीमा शक्तिरूपले स्थित छिन्, उनलाई नमस्कार छ, नमस्कार, नमस्कार छ (३)॥१२॥जुन देवी सबै प्राणीमा तृष्णारूपले विराजमान छिन्, तिनलाई नमस्कार,नमस्कार छ, नमस्कार छ (३)॥१३॥ जुन देवी सबै प्राणीमा (क्षान्ति = क्षमा) रूपले विद्यमान छिन्, उनलाई नमस्कार छ, नमस्कार छ, नमस्कार छ (३) ॥१४॥

या देवी सर्वभूतेषु जातिरूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१५॥
या देवी सर्वभूतेषु लज्जारूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१६॥
या देवी सर्वभूतेषु शान्तिरूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१७॥

जुन देवी सबै प्राणीमा जातिरूपले स्थित छन्, तिनलाई नमस्कार छ, नमस्कार छ, नमस्कार(३)॥१५॥ जुन देवी सबै प्राणीमा लज्जारूपले विराजमान छिन्, उनलाई नमस्कार, उनलाई नमस्कार छ, उनलाई नमस्कार छ (३) ॥१६॥जुन देवी सबै प्राणीमा शान्तिरूपले विद्यमान छिन्, तिनलाई बारम्बार नमस्कार छ, नमस्कार छ, नमस्कार छ (३)॥१७॥

या देवी सर्वभूतेषु श्रद्धारूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१८॥
या देवी सर्वभूतेषु कान्तिरूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१९॥
या देवी सर्वभूतेषु लक्ष्मीरूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२०॥

जुन देयी सबै प्राणीमा श्रद्धारूपले स्थित छिन्, उनलाई नमस्कार छ, नमस्कार छ, उनलाई नमस्कार छ (३)॥१८॥जुन देवी सबै प्राणीमा कान्तिरूपले विराजमान छिन्, तिनलाई नमस्कार छ, नमस्कार छ, नमस्कार छ(३)॥१९॥ जो देवी सबै प्राणीमा लक्ष्मीरूपले स्थित छिन्, उनलाई बारम्बार प्रणाम, प्रणाम छ, प्रणाम छ (३)॥२०॥

या देवी सर्वभूतेषु वृत्तिरूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२१॥
या देवी सर्वभूतेषु स्मृतिरूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२२॥
या देवी सर्वभूतेषु दयारूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२३॥

जो देवी सबै प्राणीमा वृत्तिरूपले रहन्छिन्, तिनलाई नमस्कार छ, नमस्कार छ, नमस्कार छ (३)॥२१॥ जुन देवी सबै प्राणीमा स्मृतिरूपले विराजमान छिन्, उनलाई बारम्बार नमस्कार छ, नमस्कार छ, नमस्कार छ(३)॥२२॥ जो देवी सबै प्राणीमा दयारूपले स्थित छिन्, तिनलाई नमस्कार, तिनलाई नमस्कार, तिनलाई नमस्कार (३) ॥२३॥

या देवी सर्वभूतेषु तुष्टिरूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२४॥
या देवी सर्वभूतेषु मातृरूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२५॥
या देवी सर्वभूतेषु भ्रान्तिरूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२६॥

जुन देवी सबै प्राणीमा तुष्टिरूपले स्थित छिन्, उनलाई नमस्कार, उनलाई नमस्कार, उनलाई नमस्कार (३) ॥२४॥जो देवी सबै प्राणीमा मातारूपले स्थित छिन्, उनलाई बारम्बार नमस्कार, उनलाई नमस्कार, उनलाई नमस्कार (३)॥२५॥ जुन देवी सबै प्राणीमा भ्रान्तिरूपले विद्यमान छिन्, उनलाई नमस्कार,उनलाई नमस्कार,उनलाई नमस्कार छ(३)॥२६॥

इन्द्रियाणामधिष्ठात्री भूतानां चाऽखिलेषु या।
भूतेषु सततं तस्यै व्याप्त्यै देव्यै नमो नमः ॥२७॥
चितिरूपेण या कृत्स्नमेतद्व्याप्य स्थिता जगत्।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२८॥

जुन जीवका इन्द्रियवर्गकी अधिष्ठात्री देवी र सबै प्राणीमा सदैव व्याप्त रहन्छिन्, ती व्याप्ति देवीलाई बारम्बार नमस्कार छ ॥२७॥ जो देवी चैत्यन्यरूपले सम्पूर्ण जगत् व्याप्त गरेर स्थित छिन्, उनलाई नमस्कार, उनलाई नमस्कार, उनलाई नमस्कार छ (३)॥२८॥

स्तुता सुरैः पूर्वमभीष्टसंश्रया-
त्तथा सुरेन्द्रेण दिनेषु सेविता।
करोतु सा नः शुभहेतुरीश्वरी
शुभानि भद्राण्यभिहन्तु चापदः ॥२९॥

पूर्वकालमा आफ्नू अभीष्ट प्राप्ति भएपछि देवगणले जसको स्तुति र देवराज इन्द्रले धेरै दिनसम्म जसको सेवा गरे, ती कल्याणभूता ईश्वरी हाम्रो कल्याण र मङ्गल गरून् अनि सारा विपत्ति नाश पारून् ॥२९॥

या साम्प्रतं चोद्धतदैत्यतापितै-
रस्माभिरीशा च सुरैर्नमस्यते ।
या च स्मृता तत्क्षणमेव हन्ति नः
सर्वाऽऽपदो भक्तिविनम्रमूर्तिभिः ॥३०॥

उद्दण्ड दैत्यहरूद्धारा सताइएका हामी सबै देवता जुन परमेश्वरीलाई नमस्कार गर्दछौं र जो भक्तिले विनम्र पुरुषद्धारा स्मरण गर्दा तत्काल सम्पूर्ण विपत्ति नाश गरिदिन्छिन्, ती जगदम्बा हाम्रो संकट निवारण गरून् ॥३०॥

अथ प्राधानिकं रहस्यम्

ॐ अस्य श्रीसप्तशतीरहस्यत्रयस्य नारायण ऋषिरनुष्टुप्छन्दः,महाकाली-महालक्ष्मी-महासरस्वत्यो देवता यथोक्तफलावाप्त्यर्थं जपे विनियोगः ॥

राजोवाच

भगवन्नवतारा मे चण्डिकायास्त्वयोदिताः ।
एतेषां प्रकृतिं ब्रह्मन् प्रधानं वक्तुमर्हसि ॥१॥

राजा भन्दछन् - हे भगवन् ! हजुरले चण्डिकाको अवतार-कथा मलाई सुनाउनुभयो। अब ती अवतारका प्रधान प्रवृत्तिको निरूपण गर्नुहवस् ॥१॥

आराध्यं यन्मया देव्याः स्वरूपं येन च द्विज ।
विधिना ब्रूहि सकलं यथावत् प्रणतस्य मे ।।२।।

ऋषिरुवाच

इदं रहस्यं परममनाख्येयं प्रचक्षते ।
भक्तोऽसीति न मे किञ्चित्तवावाच्यं नराधिप ।।३।।

हे ब्रह्मन् ! जुन देवीको जस्तो विधिले आराधना गर्ने हो, त्यो यथार्थ रूपले आज्ञा हवस् ।।२।। ऋषि भन्दछन्- हे राजन् ! यो रहस्य गोपनीय छ, यसैले कसैलाई सुनाउन योग्य छैन तापनि तिमी मेरा भक्त हुनाले तिमीलाई भन्न नहुने मसित केही पनि छैन ।।३।।

सर्वस्याद्या महालक्ष्मीस्त्रिगुणा परमेश्वरी ।
लक्ष्याऽलक्ष्यस्वरूपा सा व्याप्य कृत्स्नं व्यवस्थिता ।।४।।
मातुलुङ्गं गदां खेटं पानपात्रं च बिभ्रती ।
नागं लिङ्गं च योनिं च बिभ्रती नृप मूर्धनि ।।५।।

त्रिगुणा महालक्ष्मी नै सबैकी आदि कारण छन् । उनै अदृश्यरूपले सम्पूर्ण विश्वलाई व्याप्त पारेर स्थित छन् ।।४।। हे राजन् ! ती आफ्ना चार भुजामा मातुलुङ्ग, गदा, खेट (ढाल), पानपात्र र मस्तकमा नाग, लिङ्ग र योनि-यी वस्तु धारण गर्दछिन् ।।५।।

तप्तकाञ्चनवर्णाभा तप्तकाञ्चनभूषणा ।
शून्यं तदखिलं स्वेन पूरयामास तेजसा ।।६।।
शून्यं तदखिलं लोकं विलोक्य परमेश्वरी ।
बभार परमं रूपं तमसा केवलेन हि ।।७।।

तिनको पगालेको सुन झैं वर्ण र भूषण छन् । उनैले आफ्नू तेजद्वारा यो शून्य जगत्‌लाई पूर्ण पारेकी छन् ।।६।। महालक्ष्मीले जगत्‌लाई शून्य देखेर तमोगुणरूप उपाधिद्वारा यौटा उत्कृष्ट रूप धारण गरिन् ।।७।।

सा भिन्नाञ्जनसंकाशा दंष्ट्राङ्कितवरानना ।
विशाललोचना नारी बभूव तनुमध्यमा ।।८।।
खड्गपात्रशिरः - खेटैरलंकृतचतुर्भुजा ।
कबन्धहारं शिरसा बिभ्राणा हि शिरःस्रजम् ।।९।।

त्यो रूप यौटी नारीको रूपमा प्रकट भयो, जसको देहको कान्ति गाजल झैं कालो रंगको थियो । उनको मुख दाह्राले सुशोभित र ठूल-ठूला नेत्र तथा कम्मर पातलो थियो ।।८।। तिनका चार भुजाहरू ढाल, तरबार, प्याला र काटिएको मस्तकले सुशोभित थियो । उनले वक्षस्थलमा कबन्ध (गीँड) को र मस्तकमा मुण्डमाला धारण गरेकी थिइन् ।।९।।

सा प्रोवाच महालक्ष्मीं तामसी प्रमदोत्तमा ।
नाम कर्म च मे मातर्देहि तुभ्यं नमो नमः ॥१०॥
तां प्रोवाच महालक्ष्मीस्तामसीं प्रमदोत्तमाम् ।
ददामि तव नामानि यानि कर्माणि तानि ते ॥११॥

यसरी प्रकट भएकी तामसी देवीले महालक्ष्मीसित भनिन्– 'हे माता! हजुरलाई नमस्कार छ । मलाई मेरो नाम र कर्म भन्नुहवस् ॥१०॥ अनि महालक्ष्मीले ती तामसी देवीसित भनिन्– 'म तिम्रो नाम र कर्म भन्दछु, सुन–॥११॥

महामाया महाकाली महामारी क्षुधा तृषा ।
निद्रा तृष्णा चैकवीरा कालरात्रिर्दुरत्यया ॥१२॥
इमानि तव नामानि प्रतिपाद्यानि कर्मभिः ।
एभिः कर्माणि ते ज्ञात्वायोऽधीतेसोऽश्नुतेसुखम् ॥१३॥

महामाया, महाकाली, महामारी, क्षुधा, तृषा, निद्रा, तृष्णा, एकवीरा, कालरात्रि र दुरत्यया यी तिम्रा नाम हुन्, जो कर्मद्वारा लोकमा चरितार्थ हुने छन् । यी नामद्वारा तिम्रा कर्म जानेर जो पाठ गर्दछन्, ती सुख-भोग गर्दछन् ॥१२-१३॥

तामित्युक्त्वा महालक्ष्मीः स्वरूपमपरं नृप ।
सत्त्वाख्येनाऽतिशुद्धेन गुणेनेन्दुप्रभं दधौ ॥१४॥
अक्षमालाङ्कुशधरा वीणापुस्तकधारिणी ।
सा बभूव वरा नारी नामान्यस्यै च सा ददौ ॥१५॥

महाकालीसित यति भनेर महालक्ष्मीले शुद्ध सत्त्वगुणद्वारा अर्को रूप धारण गरिन्, त्यो चन्द्रमा झैं गौर वर्ण थियो ॥१४॥ तिनका हातमा अक्षमाला, अंकुश, वीणा र पुस्तक थिए । ती महालक्ष्मीले तिनलाई पनि नाम प्रदान गरिन् ॥१५॥

महाविद्या महावाणी भारती वाक् सरस्वती ।
आर्या ब्राह्मी कामधेनुर्वेदगर्भा च धीश्वरी ॥१६॥
अथोवाच महालक्ष्मीर्महाकालीं सरस्वतीम् ।
युवां जनयतां देव्यौ मिथुने स्वानुरूपतः ॥१७॥

महाविद्या, महावाणी, भारती, वाक्, सरस्वती, आर्या, ब्राह्मी, कामधेनु, वेदगर्भा, धीश्वरी- यी तिम्रा नाम हुने छन् ॥१६॥ अनि महालक्ष्मीले महाकाली र सरस्वतीःसित भनिन्- तिमी दुवै आफाफ्ना गुणको योग्य स्त्री-पुरुषको जोडी उत्पन्न गर ॥१७॥

इत्युक्त्वा ते महालक्ष्मीः ससर्ज मिथुनं स्वयम् ।
हिरण्यगर्भौ रुचिरौ स्त्रीपुंसौ कमलासनौ ॥१८॥
ब्रह्मन् विधे विरिञ्चेति धातरित्याह तं नरम् ।
श्रीःपद्मे कमले लक्ष्मीत्याह माता च तां स्त्रियम् ॥१९॥

ती दुवैसित यति भनेर महालक्ष्मीले स्वयं नै स्त्री-पुरुषको एक जोडा उत्पन्न गरिन् । ती दुवै हिरण्यगर्भ र कमलको आसनमा विराजमान थिए । ती-मध्ये यौटी स्त्री र अर्को पुरुष थिए ॥१८॥ अनि महालक्ष्मीले पुरुषलाई ब्रह्मन् ! विधे ! विरिञ्च ! र धात! यसरी सम्बोधित गरिन् र स्त्रीलाई श्रीः ! पद्मा ! कमला! लक्ष्मी! आदि नाम राखिन् ॥१९॥

महाकाली भारती च मिथुने सृजतः सह ।
एतयोरपि रूपाणि नामानि च वदामि ते ॥२०॥
नीलकण्ठं रक्तबाहुं श्वेताङ्गं चन्द्रशेखरम् ।
जनयामास पुरुषं महाकाली सितां स्त्रियम् ॥२१॥

अनि महाकाली र महासरस्वतीले पनि एक - एक जोडी उत्पन्न गरे- तिनको रूप र नाम पनि सुन-महाकालीले नीलो घाँटी, गोरो अंग, राता भुजा, सेतो शरीर, मस्तकमा चन्द्रमाको मुकुट धारण गर्ने पुरुष र गोरो रंगकी स्त्रीलाई जन्म दिइन् ॥२०-२१॥

स रुद्रः शंकरः स्थाणुः कपर्दी च त्रिलोचनः ।
त्रयी विद्या कामधेनुः सा स्त्री भाषाऽक्षरा स्वरा ।।२२।।
सरस्वती स्त्रियं गौरीं कृष्णं च पुरुषं नृप ।
जनयामास नामानि तयोरपि वदामि ते ।।२३।।

ती पुरुष रुद्र, स्थाणु, कपर्दी, शंकर र त्रिलोचन नामले प्रसिद्ध भए तथा स्त्रीको त्रयी, विद्या, कामधेनु, भाषा, अक्षरा र स्वरा- यी नाम भए ।।२२।। राजन् ! महासरस्वतीले गोरो रंगकी स्त्री र श्याम रंगको पुरुष प्रकट गरिन् । ती दुवैको नाम पनि सुन ।।२३।।

विष्णुः कृष्णो हृषीकेशो वासुदेवो जनार्दनः ।
उमा गौरी सती चण्डी सुन्दरी सुभगा शिवा ।।२४।।
एवं युवतयः सद्यः पुरुषत्वं प्रपेदिरे ।
चक्षुष्मन्तोऽनुपश्यन्ति नेतरेऽतद्विदो जनाः ।।२५।।

तिनमा पुरुषको नाम विष्णु,कृष्ण, हृषीकेश, वासुदेव र जनार्दन भए तथा स्त्रीमा उमा, गौरी, सती, चण्डी, सुन्दरी, सुभगा र शिवा-यी नामले प्रसिद्ध भइन् । यो कुरा ज्ञान-नेत्र हुनेले नै जान्दछन्, अज्ञानीले यो रहस्य जान्न सक्तैनन्।।२४-२५।।

ब्रह्मणे प्रददौ पत्नीं महालक्ष्मीर्नृप त्रयीम् ।
रुद्राय गौरीं वरदां वासुदेवाय च श्रियम् ॥२६॥
स्वरया सह सम्भूयविरिञ्चोऽण्डमजीजनत् ।
बिभेद भगवान् रुद्रस्तद्गौर्या सह वीर्यवान् ॥२७॥

राजन् ! महालक्ष्मीले त्रयीविद्यारूपमा सरस्वती ब्रह्माको निम्ति पत्नीरूपमा समर्पित गरिन्, रुद्रलाई गौरी र भगवान् वासुदेवलाई लक्ष्मी दिइन् ॥२६॥ यसरी सरस्वती - सहित ब्रह्माले ब्रह्माण्ड उत्पन्न गरे र पराक्रमी रुद्रले

अण्डमध्ये प्रधानादि कार्यजातमभून्नृप ।
महाभूतात्मकं सर्वं जगत्स्थावरजङ्गमम् ॥२८॥
पुपोष पालयामास तल्लक्ष्म्या सह केशवः ।
संजहार जगत्सर्वं सह गौर्या महेश्वरः ॥२९॥

गौरीसित मिलेर त्यसको भेदन गरे ॥२७॥ त्यस ब्रह्माण्डमा प्रधान कार्यसमूह-पञ्चमहाभूतात्मक स्थावर जङ्गमरूप जगत्को उत्पत्ति भयो ॥२८॥ लक्ष्मीसित विष्णुले त्यस जगत्को पालन-पोषण गरे र प्रलयकालमा महेश्वरले सम्पूर्ण जगत्को संहार गर्ने गरे ॥२९॥

महालक्ष्मीर्महाराज सर्वसत्त्वमयीश्वरी ।
निराकारा च साकारा सैव नानाभिधानभृत् ॥३०॥
नामान्तरैर्निरूप्यैषा नाम्ना नान्येन केनचित् ॥ॐ॥३१॥

॥इति प्राधानिकं रहस्यं सम्पूर्णम् ॥

हे महाराज ! महालक्ष्मी नै सबै सत्त्वहरूकी अधीश्वरी हुन् । उनै निराकार र साकार रूपले अनेक नाम धारण गर्दछिन् । सगुणवाचक सत्य, शान, चित्, महामाया आदि नामान्तरहरूले यिनको निरूपण गर्नुपर्दछ । केवल यौटा नामले अथवा अन्य प्रत्यक्ष आदि प्रमाणले उनको वर्णन हुन सक्तैन ॥३०-३१॥

अथ वैकृतिकं रहस्यम्

ऋषिरुवाच-

ॐ त्रिगुणा तामसी देवी सात्त्विकी या त्रिधोदिता ।
सा शर्वा चण्डिका दुर्गा भद्रा भगवतीर्यते ॥१॥

ऋषि भन्दछन्- हे राजन् ! पहिले जुन त्रिगुणा महालक्ष्मीलाई तामसी आदि भेदले तीन रूप कहियो, उनै शर्वा, चण्डिका, दुर्गा, भद्रा र भगवती नामले कहिन्छिन् ॥१॥

योगनिद्रा हरेरुक्ता महाकाली तमोगुणा।
मधुकैटभनाशार्थं यां तुष्टावाऽम्बुजासनः ॥२॥
दशवक्त्रा दशभुजा दशपादाऽञ्जनप्रभा।
विशालया राजमाना त्रिंशल्लोचनमालया ॥३॥

तमोगुणमयी महाकाली विष्णुको योगनिद्रा कहिन्छिन्। मधु कैटभको नाश गर्न ब्रह्माले जसको स्तुति गरेका थिए, तिनैको नाम महाकाली हो ॥२॥ तिनका दश मुख, दश भुजा र दश पाउ छन्। ती गाजल झैं काली र तीस नेत्रका मालाले शोभित छन् ॥३॥

स्फुरद्दशनदंष्ट्रा सा भीमरूपाऽपि भूमिप।
रूपसौभाग्यकान्तीनां सा प्रतिष्ठा महाश्रियः ॥४॥
खड्गबाणगदाशूलचक्रशङ्खभुशुण्डिभृत्।
परिघं कार्मुकं शीर्षं निश्च्योतद्रुधिरं दधौ ॥५॥

हे भूपाल ! तिनका दाँत र दाह्रा टल्कनाले रूप डरलाग्दो छ तापनि ती रूप, सौभाग्य र सम्पत्तिकी प्राप्तिस्थान छन् ॥४॥ तिनका बाहुमा खड्ग, बाण, गदा, शूल, चक्र, भुशुण्डि, परिघ र धनुष तथा काटिएको रगत चुहुने मस्तक धारण गर्दछिन् ॥५॥

एषा सा वैष्णवी माया महाकाली दुरत्यया ।
आराधिता वशीकुर्यात् पूजाकर्तुश्चराचरम् ॥६॥
सर्वदेवशरीरेभ्यो याऽऽविर्भूताऽमितप्रभा ।
त्रिगुणा सा महालक्ष्मीः साक्षान्महिषमर्दिनी ॥७॥

ती विष्णुकी दुस्तर माया हुन् । आराधना गर्नाले चराचर जगत् आफ्ना उपासकको अधीन पारिदिन्छिन् ॥६॥ सबै देवताको अंगबाट जसको प्रादुर्भाव भएको थियो, ती अनन्त कान्तियुक्त महालक्ष्मी हुन् । तिनैलाई प्रकृति भन्दछन् र उनैले महिषासुरलाई मारिन् ॥७॥

श्वेताऽऽनना नीलभुजा सुश्वेतस्तनमण्डला ।
रक्तमध्या रक्तपादा नीलजङ्घोरुरुन्मदा ॥८॥
सुचित्रजघना चित्रमाल्याऽम्बरविभूषणा ।
चित्रानुलेपना कान्तिरूपसौभाग्यशालिनी ॥९॥

तिनको मुख गोरो, हात श्याम, स्तनमण्डल सेतो, कटिभाग र चरण राता, तिघ्रा र पिंडुला नीलो रंगका छन् । अजेय हुनाले उनलाई आफ्नू शौर्यको अभिमान छ ॥८॥ कटिको अग्रभाग बहुरंगा वस्त्रले ढाकिनाले राम्रो र विचित्र देखिन्छ । तिनको माला, वस्त्र आभूषण पनि विचित्र छन् । ती कान्ति, रूप र सौभाग्यले सुशोभित छन् ॥९॥

अष्टादशभुजा पूज्या सा सहस्रभुजा सती ।
आयुधान्यत्र वक्ष्यन्ते दक्षिणाधःकरक्रमात् ॥१०॥
अक्षमाला च कमलं बाणोऽसिः कुलिशं गदा ।
चक्रं त्रिशूलं परशुः शङ्खो घण्टा च पाशकः ॥११॥

हजारौं भुजा भए पनि उनलाई अठार भुजायुक्त मानेर पूजा गर्नु योग्य छ । उनका अठारै भुजामा जुन जुन अस्त्र छन् तिनको वर्णन सुन ॥१०॥ अक्षमाला, कमल, बाण, खड्ग, वज्र, गदा, चक्र, त्रिशूल, परशु, शङ्ख, घण्टा, पाश ॥११॥

शक्तिर्दण्डश्चर्म चापं पानपात्रं कमण्डलुः ।
अलंकृतभुजामेभिरायुधैः कमलाऽऽसनाम् ॥१२॥
सर्वदेवमयीमीशां महालक्ष्मीमिमां नृप ।
पूजयेत् सर्वलोकानां स देवानां प्रभुर्भवेत् ॥१३॥

शक्ति, दण्ड, चर्म, धनुष, पानपात्र र कमण्डलु यी आयुधहरूले तिनका बाहु विभूषित छन् । ती कमलमा विराजमान सबैकी ईश्वरी हुन् । हे राजन् ! जो यिनको पूजा गर्दछन्, ती सबै लोक र देवताहरूको पनि स्वामी हुन्छ ॥१२-१३॥

गौरीदेहात् समुद्भूता या सत्त्वैकगुणाऽऽश्रया ।
साक्षात् सरस्वती प्रोक्ता शुम्भासुरनिबर्हिणी ॥१४॥
दधौ चाऽष्टभुजा बाणमुसले शूलचक्रभृत् ।
शङ्खं घण्टां लाङ्गलं च कार्मुकं वसुधाधिप ॥१५॥

जो केवल सत्त्वगुणको आश्रित भएर पार्वतीको अङ्गबाट प्रकट भएकी थिइन्-जसले शुम्भको संहार गरिन्- ती साक्षात् सरस्वती कहिन्छिन् ॥१४॥ हे पृथ्वीपते! ती आफ्ना आठ बाहुमा बाण, मुसल, शूल, चक्र, शङ्ख, घण्ट, हलो र धनुष धारण गर्दछिन् ॥१५॥

एषा सम्पूजिता भक्त्या सर्वज्ञत्वं प्रयच्छति ।
निशुम्भमथिनी देवी शुम्भासुरनिबर्हिणी ॥१६॥
इत्युक्तानि स्वरूपाणि मूर्तीनां तव पार्थिव ।
उपासनं जगन्मातुः पृथगासां निशामय ॥१७॥

यी सरस्वती देवी, जो निशुम्भको मर्दन, शुम्भको संहार गर्दछिन्, भक्तिपूर्वक पूजित भएपछि सर्वज्ञता दिन्छिन् ॥१६॥ हे राजन् ! यसरी महाकाली आदि तीन मूर्तिहरूको स्वरूप वर्णन गरें, अब यी तीन मूर्तिहरूको भिन्न-भिन्न उपासना सुन ॥१७॥

महालक्ष्मीर्यदा पूज्या महाकाली सरस्वती ।
दक्षिणोत्तरयोः पूज्ये पृष्ठतो मिथुनत्रयम् ।।१८।।
विरञ्चिः स्वरया मध्ये रुद्रो गौर्या च दक्षिणे ।
वामे लक्ष्म्या हृषीकेशः पुरतो देवतात्रयम् ।।१९।।

तिनको पूजा गर्दा माझमा महालक्ष्मी र दायाँ-बायाँ महाकाली र सरस्वतीको पूजा गर्नू । पृष्ठभागमा तिनै युगल देवताको पूजा गर्नुपर्दछ ।।१८।। महालक्ष्मीको पछाडि मध्यभागमा सरस्वतीका साथै ब्रह्माको पूजा गर्नू । तिनको दाहिनेतिर गौरीसहित रुद्रको पूजा गर्नू, अनि बायाँ भागमा विष्णु सहित लक्ष्मीको पूजा गर्नू ।।१९।।

अष्टादशभुजामध्ये वामे चाऽस्या दशानना ।
दक्षिणेऽष्टभुजा लक्ष्मीर्महतीति समर्चयेत् ।।२०।।
अष्टादशभुजा चैषा यदा पूज्या नराधिप ।
दशानना चाऽष्टभुजा दक्षिणोत्तरयोस्तदा ।।२१।।

माझको महालक्ष्मीको अगाडि अठार बाहु हुने महालक्ष्मीको पूजा गरोस् । तिनको बायाँतिर दश मुख हुने महाकालीको र दाहिनेतिर आठ भुजा हुने सरस्वतीको पूजा गरोस् ।।२०।। हे राजन् ! यी तीन देवीको पूजा गर्दा अरिष्ट शान्तिका लागि तिनको दायाँतिर काल र बायाँतिर ।।२१।।

कालमृत्यू च सम्पूज्यौ सर्वारिष्टप्रशान्तये ।
यदा चाष्टभुजा पूज्या शुम्भासुरनिबर्हिणी ॥२२॥
नवास्याः शक्तयः पूज्यास्तदा रुद्रविनायकौ ।
नमो देव्या इति स्तोत्रैर्महालक्ष्मीं समर्चयेत् ॥२३॥

मृत्युको पनि पूजा गर्नू । शुम्भासुरको संहार गर्ने अष्टभुजा देवीको पूजा गर्दा, उनैसित नौ शक्तिहरूको र दाहिनेतिर रुद्र एवं बायाँतिर गणेशको पनि पूजा गर्नू । (ब्राह्मी, माहेश्वरी, कौमारी, वैष्णवी, वाराही, नारसिंही, ऐन्द्री, शिवदूती र चामुण्डा–यी नौ शक्ति हुन्) नमो देव्यैः... यस स्तोत्रले महालक्ष्मीको पूजा गर्नू ॥२२-२३॥

अवतारत्रयाऽर्चायां स्तोत्रमन्त्रास्तदाश्रयाः ।
अष्टादशभुजा चैषा पूज्या महिषमर्दिनी ॥२४॥
महालक्ष्मीर्महाकाली सैव प्रोक्ता सरस्वती ।
ईश्वरी पुण्यपापानां सर्वलोकमहेश्वरी ॥२५॥

अनि उनका तीन अवतारको पूजा गर्दा उनका चरित्रहरूमा जुन स्तोत्र-मन्त्र आएका छन्, तिनैको उपयोग गर्नू । अठार भुजा हुने महिषासुरमर्दिनी महालक्ष्मी नै पूजनीया छिन्, किनकि महालक्ष्मी, महाकाली र महासरस्वती पनि उनै कहिन्छिन् । तिनै पाप-पुण्यकी अधीश्वरी र सबै लोककी महेश्वरी हुन् ॥२४-२५॥

महिषान्तकरी येन पूजिता स जगत्प्रभुः ।
पूजयेज्जगतां धात्रीं चण्डिकां भक्तवत्सलाम् ॥२६॥
अर्घ्यादिभिरलंकारैर्गन्धपुष्पैस्तथाऽक्षतैः ।
धूपैर्दीपैश्च नैवेद्यैर्नानाभक्ष्यसमन्वितैः ॥२७॥

जसले महिषासुरको अन्त्य पार्ने महालक्ष्मीको भक्तिपूर्वक आराधना गऱ्यो, त्यही संसारको स्वामी हो । अतः भक्तवत्सला चण्डिकाको पूजा अवश्य गर्नुपर्दछ ॥२६॥ जल, चन्दन, पुष्पाक्षत, धूप-दीप,नैवेद्य र रक्त सिञ्चित बलि एवं मांस-मदिराले पनि देवीको पूजा गरिन्छ ॥२७॥

रुधिराक्तेन बलिना मांसेन सुरया नृप ।
(बलिमांसादिपूजेयं विप्रवर्ज्या मयेरिता ॥
तेषां किल सुरामांसैर्नोक्ता पूजा नृप क्वचित् ।)
प्रणामाऽऽचमनीयेन चन्दनेन सुगन्धिना ॥२८॥

जो व्यक्ति मांस-मदिराको व्यवहार गर्दछन्, उनकै निम्ति बलि र मांस मदिराद्वारा पूजाको विधान छ । शेष व्यक्तिले मांस-मदिरा आदिले पूजा नगर्नू। फेरि त्यो पूजा ब्राह्मण - बाहेक अरूलाई कहिएको छ । तर ब्राह्मणको निम्ति मांस-मदिराको पूजा विधान कहीं पनि निर्देश गरिएको पाइन्न । प्रणाम, आचमन, चन्दन, कपूर र पान आदि निवेदन गर्नुपर्दछ ॥२८॥

सकर्पूरैश्च ताम्बूलैर्भक्तिभावसमन्वितैः ।
वामभागेऽग्रतो देव्याश्छिन्नशीर्षं महासुरम् ।।२९।।
पूजयेन्महिषं येन प्राप्तं सायुज्यमीशया ।
दक्षिणे पुरतः सिंहं समग्रं धर्ममीश्वरम् ।।३०।।

देवीको सामुन्ने बायाँ भागमा काटिएको मस्तक हुने महिषासुरको पनि पूजा गर्नू ।।२९।। जसले भगवतीद्वारा सायुज्य मुक्ति प्राप्त गर्‍यो । त्यसै गरी देवीको दक्षिण भागमा उनको वाहन सिंहको पूजा गर्नू ।।३०।।

वाहनं पूजयेद्देव्या धृतं येन चराचरम् ।
कुर्याच्च स्तवनं धीमाँस्तस्या एकाग्रमानसः ।।३१।।
ततः कृताञ्जलिर्भूत्वा स्तुवीत चरितैरिमैः ।
एकेन वा मध्यमेन नैकेनेतरयोरिह ।।३२।।

जसले षडैश्वर्ययुक्त भएर चराचर जगत् धारण गरिराखेको छ । अनि बुद्धिमान् पुरुष एकाग्र भएर देवीको स्तुति गरोस् ।।३१।। अनि हात जोरेर पूर्वोक्त तीनै चरित्रको पाठ गरोस् । यदि कोही यौटै चरित्रको पाठ गर्ने इच्छुक छ भने मध्यम चरित्र नै पढोस् । प्रथम र उत्तर चरित्रमध्ये यौटाको पाठ नगर्नू ।।३२।।

चरितार्धं तु न जपेज्जपञ्छिद्रमवाप्नुयात् ।
प्रदक्षिणानमस्कारान् कृत्वा मूर्ध्नि कृताञ्जलिः ॥३३॥
क्षमापयेज्जगद्धात्रीं मुहुर्मुहुरतन्द्रितः ।
प्रतिश्लोकं च जुहुयात् पायसं तिलसर्पिषा ॥३४॥

आधा चरित्रको पाठ पनि निषेध छ । आधा चरित्र पाठ गरेको कुनै फल छैन। पाठ सकिएपछि साधकले प्रदक्षिणा र नमस्कार उनीसित बारम्बार अपराधको निम्ति ॥३३॥ क्षमा-याचना गरोस् । सप्तशतीको प्रत्येक श्लोक मन्त्ररूप हुनाले तिल-घिउ मिसाएको पायसको आहुति दिनू ॥३४॥

जुहुयात् स्तोत्रमन्त्रैर्वा चण्डिकायै शुभं हविः ।
भूयो नामपदैर्देवीं पूजयेत् सुसमाहितः ॥३५॥
प्रयतः प्राञ्जलिः प्रह्वः प्रणम्यारोप्य चात्मनि ।
सुचिरं भावयेदीशां चण्डिकां तन्मयो भवेत् ॥३६॥

अथवा सप्तशतीमा आएका मन्त्रले चण्डिकाको निम्ति पवित्र हविष्यको हवन गरून् ॥३५॥ अनि मन र इन्द्रिय रोकेर हात जोरी देवीलाई प्रणाम गरी अन्तःकरणमा मनन गरेर चण्डिका देवीको निकै बेरसम्म चिन्तन गर्दागर्दै उनैमा तन्मय होओस् ॥३६॥

एवं यः पूजयेद् भक्त्या प्रत्यहं परमेश्वरीम् ।
भुक्त्वाभोगान्यथाकामंदेवीसायुज्यमाप्नुयात् ।।३७।।
यो न पूजयते नित्यं चण्डिकां भक्तवत्सलाम् ।
भस्मीकृत्याऽस्य पुण्यानि निर्दहेत् परमेश्वरी ।।३८।।

यसरी जसले प्रतिदिन पूजन गर्दछ, त्यो इच्छित भोग भोगेर अन्त्यमा सायुज्य प्राप्त गर्दछ ।।३७।। जसले प्रतिदिन पूजा गर्दैन, भगवती त्यसको पुण्य पोलेर खरानी पारिदिन्छिन् ।।३८।।

तस्मात् पूजय भूपाल सर्वलोकमहेश्वरीम् ।
यथोक्तेन विधानेन चण्डिकां सुखमाप्स्यसि ।।३९।।

।। इति वैकृतिकं रहस्यं सम्पूर्णम् ।।

अतः हे राजन् ! तिमी महेश्वरीको विधिपूर्वक पूजन गर, त्यसले तिमीलाई सुख प्राप्त हुनेछ ।।३९।। इति ।।

।।इति वैकृतिक रहस्यको टीका सकियो।।

अथ मूर्तिरहस्यम्

ऋषिरुवाच—

ॐ नन्दा भगवती नाम या भविष्यति नन्दजा ।
स्तुता सा पूजिता भक्त्यावशीकुर्याज्जगत्त्रयम् ।।१।।

ऋषि भन्दछन्- हे राजन् ! नन्दादेवी जुन नन्दबाट उत्पन्न हुनेछन्, तिनको भक्तिपूर्वक पूजा र स्तुति गरे ती तीनै लोकक्न उपासकको अधीन पारिदिन्छिन् ।।१।।

कनकोत्तमकान्तिः सा सुकान्तिकनकाम्बरा ।
देवी कनकवर्णाभा कनकोत्तमभूषणा ।।२।।
कमलाङ्कुशपाशाब्जैरलंकृतचतुर्भुजा ।
इन्दिरा कमला लक्ष्मीः सा श्रीरुक्माम्बुजासना ।।३।।

उनको अङ्गको कान्ति कनक समान छ । ती सुनकै रङ्गका वस्त्र धारण गर्दछिन् । तिनको तेज सुनकै तुल्य छ र ती सुवर्णकै उत्तम गहना धारण गर्दछिन् ।।२।। तिनका चार भुजामा कमल, अङ्कुश, पाश र शङ्ख सुशोभित छन् । ती इन्दिरा, कमला, लक्ष्मी र रुक्माम्बुजासना आदि नामले प्रख्यात छिन् ।।३।।

या रक्तदन्तिका नाम देवी प्रोक्ता मयाऽनघ ।
तस्याः स्वरूपं वक्ष्यामि शृणु सर्वभयापहम् ।।४।।
रक्ताम्बरा रक्तवर्णा रक्तसर्वाङ्गभूषणा ।
रक्तायुधा रक्तनेत्रा रक्तकेशाऽतिभीषणा ।।५।।

हे निष्पाप नरेश ! अब तिमी रक्तदन्तिकाको स्वरूपको वर्णन सुन- ती सबै प्रकारका भयनाश गर्दछिन् ।।४।। ती रातो रंगको वस्त्र धारण गर्दछिन् र शरीरको रङ्ग पनि रातै छ तथा अङ्गका सबै आभूषण पनि रातै छन् । तिनका अस्त्र-शस्त्र, नेत्र, कपालका रौं, ।।५।।

रक्ततीक्ष्णनखा रक्तदशना रक्तदन्तिका ।
पतिं नारीवाऽनुरक्ता देवी भक्तं भजेज्जनम् ।।६।।
वसुधेव विशाला सा सुमेरुयुगलस्तनी ।
दीर्घौ लम्बावतिस्थूलौ तावतीव मनोहरौ ।।७।।

तीखा नङ र दाँत पनि रक्तवर्णकै छन्- यसैले ती रक्तदन्तिका कहिन्छिन् र डरलाग्दी देखिइन्छिन् । स्त्रीले पतिप्रति अनुराग राखेझैं, देवी आफ्ना भक्तमाथि आमाले झैं दया राख्छिन् उनी पृथिवी विशाल झैं छिन् ।।६।। तिनका दुवै स्तन सुमेरु पर्वत जस्ता छन् । ती अत्यन्त लामा, चाक्ला र स्थूल छन् ।।७।।

कर्कशावतिकान्तौ तौ सर्वानन्दपयोनिधी।
भक्तान् सम्पाययेद्देवी सर्वकामदुघौ स्तनौ ॥८॥
खड्गं पात्रं च मुसलं लाङ्गलं च बिभर्ति सा।
आख्याता रक्तचामुण्डा देवी योगेश्वरीति च ॥९॥

कठोर भए पनि साह्रै कमनीय छन् र पूर्णानन्दकी समुद्र जस्तै छन्। ती सबै कामना पूर्ण पार्ने दुवै स्तन भएकी ती देवी आफ्ना भक्तलाई स्तन-पान गराउँछिन् ॥८॥ ती आफ्ना चार भुजामा खड्ग, पानपात्र, मुसल र हल धारण गर्दछिन्। तिनै रक्त चामुण्डा वा योगेश्वरी कहिन्छिन् ॥९॥

अनया व्याप्तमखिलं जगत्स्थावरजङ्गमम्।
इमां यः पूजयेद् भक्त्या स व्याप्नोति चराचरम् ॥१०॥
(भुक्त्वा भोगान् यथाकामं देवीसायुज्यमाप्नुयात्)।
अधीते य इमं नित्यं रक्तदन्त्या वपुःस्तवम्।
तं सा परिचरेद्देवी पतिं प्रियमिवाङ्गना ॥११॥

चराचर जगत् व्याप्त पार्ने यिनै देवीको जो भक्तिपूर्वक पूजा गर्दछ त्यो पनि चराचर जगत्मा व्याप्त हुन्छ ॥१०॥ अर्थात् सबै भोग भोगेर सायुज्य प्राप्त गर्दछ। जो दिनहुँ देवीको यो शरीरको स्तवन गर्दछ, त्यसको ती देवी संरक्षणरूप सेवा गर्दछिन् – त्यसै गरी जसरी प्रतिव्रता नारी आफ्नू पतिको परिचर्या गर्दछन् ॥११॥

शाकम्भरी नीलवर्णा नीलोत्पलविलोचना ।
गम्भीरनाभिस्त्रिवलीविभूषिततनूदरी ॥१२॥
सुकर्कशसमोत्तुङ्गवृत्तपीनघनस्तनी ।
मुष्टिं शिलीमुखापूर्णं कमलं कमलालया ॥१३॥

शाकम्भरी देवीको शरीरको कान्ति नीलो छ, तिनका नेत्र नीलकमल झैं छन्, नाभि गहीरो र त्रिवलीद्वारा विभूषित उदर (मध्यभाग) सूक्ष्म छ ॥१२॥ उनका दुवै स्तन कठोर र सबैतर्फबाट समान अग्ला, बाटुला र स्थूल तथा परस्पर टाँसिएका छन् । मुट्ठीभरि वाण छन्, ती देवीको निवासस्थान कमल छ ॥१३॥

पुष्पपल्लवमूलादिफलाढ्यं शाकसञ्चयम् ।
काम्यानन्तरसैर्युक्तं क्षुत्तृण्मृत्युभयापहम् ॥१४॥
कार्मुकं च स्फुरत्कान्ति बिभ्रती परमेश्वरी ।
शाकम्भरी शताक्षी सा सैव दुर्गा प्रकीर्तिता ॥१५॥

शाकसमूह र धनुष धारण गर्दछिन् । त्यो शाकसमूह इच्छित रसयुक्त, भोक-प्यास र मृत्युको भय नष्ट पार्ने तथा फूल, पल्लव, मूल, फलहरूले सम्पन्न छ । तिनै शाकम्भरी, शताक्षी र दुर्गा कहिन्छिन् ॥१४-१५॥

विशोका दुष्टदमनी शमनी दुरितापदाम् ।
उमा गौरी सती चण्डी कालिका सा च पार्वती ॥१६॥
शाकम्भरीं स्तुवन् ध्यायञ्जपन्सम्पूजयन्नमन् ।
अक्षय्यमश्नुते शीघ्रमन्नपानाऽमृतं फलम् ॥१७॥

ती शोकरहित, दुष्टदमन गर्ने र विपत्ति शान्त पार्दछिन् । उमा, गौरी, सती, चण्डी, कालिका र पार्वती पनि तिनै हुन् ॥१६॥ जो व्यक्ति शाकम्भरी देवीको स्तुति, ध्यान, जप, पूजा गर्दछन्, ती शीघ्र अमृतरूप अक्षय फलका भागी हुन्छन् ॥१७॥

भीमाऽपि नीलवर्णा सा दंष्ट्रादशनभासुरा ।
विशाललोचना नारी वृत्तपीनपयोधरा ॥१८॥
चन्द्रहासं च डमरुं शिरःपात्रं च बिभ्रती ।
एकवीरा कालरात्रिः सैवोक्ता कामदा स्तुता ॥१९॥

भीमादेवीको वर्ण नीलो छ । तिनको दाह्रा दाँत टल्किरहन्छ, तिनका ठूला-ठूला नेत्र र रूप स्त्रीको छ, स्तन बाटुला र स्थूल छन् ॥१८॥ तिनका बाहुमा चन्द्रहास, डमरु, काटिएको शिर र पानपात्र धारण गर्दछिन् । तिनै एक-वीरा, कालरात्रि र कामदा कहिन्छिन् ॥१९॥

तेजोमण्डलदुर्धर्षा भ्रामरी चित्रकान्तिभृत् ।
चित्रानुलेपना देवी चित्राभरणभूषिता ॥२०॥
चित्रभ्रमरपाणिः सा महामारीति गीयते ।
इत्येता मूर्तयो देव्या याः ख्याता वसुधाऽधिप ॥२१॥

भ्रामरी देवीको कान्ति विचित्र छ । ती आफ्नू तेजोमण्डलले दुर्धर्ष देखिन्छिन्। तिनको अङ्गराग पनि अनेक रङ्गको छ र ती चित्र-विचित्र आभूषणहरूले विभूषित छन् ॥२०॥ चित्रभ्रमरपाणि र महामारी आदि नामले उनको गुणगान गरिन्छ । हे राजन् ! यसरी चण्डिका देवीका यी मूर्तिहरू कहिएका छन् ॥२१॥

जगन्मातुश्चण्डिकायाः कीर्तिताः कामधेनवः ।
इदं रहस्यं परमं न वाच्यं कस्यचित्त्वया ॥२२॥
व्याख्यानं दिव्यमूर्तीनामभीष्टफलदायकम् ।
तस्मात् सर्वप्रयत्नेन देवीं जप निरन्तरम् ॥२३॥

यिनको कीर्तन गर्नाले कामधेनुले झैं सम्पूर्ण कामना पूर्ण पारिदिन्छिन् । यो तिमीले अरू कसैलाई भन्नु योग्य छैन ॥२२॥ दिव्य मूर्तिहरूको यो आख्यान इच्छित फलदाता छ, अतः तिमी निरन्तर देवीको आराधनामा लागिरहू ॥२३॥

सप्तजन्मार्जितैर्घोरैर्ब्रह्महत्यासमैरपि ।
पाठमात्रेण मन्त्राणां मुच्यते सर्वकिल्बिषैः ॥२४॥
देव्या ध्यानं मया ख्यातं गुह्याद् गुह्यतरं महत् ।
तस्मात् सर्वप्रयत्नेन सर्वकामफलप्रदम् ॥२५॥

सप्तशती मन्त्रको पाठमात्रले मनुष्य सात जन्ममा गरिएका ब्रह्महत्या जस्ता घोर-पापबाट पनि मुक्त हुन्छ ॥२४॥ अतः मैले प्रयत्न गरेर देवीको गोपनीयभन्दा पनि अत्यन्त गोपनीय ध्यानको वर्णन गरें- यो सबै प्रकारका इच्छित फलदाता छ ॥२५॥

(एतस्यास्त्वं प्रसादेन सर्वमान्यो भविष्यसि ।
सर्वरूपमयी देवी सर्वं देवीमयं जगत् ।
अतोऽहं विश्वरूपां तां नमामि परमेश्वरीम् ॥)

॥इति मूर्तिरहस्यं सम्पूर्णम् ॥

(उनको प्रसादले तिमी सर्वमान्य हुनेछौ । देवी सर्वरूपमयी छन् र सम्पूर्ण जगत् देवीमय छ । अतः म ती विश्वरूपा देवीलाई नमस्कार गर्दछु ॥)

॥ इति मूर्तिरहस्यको टीका सकियो ॥

सिद्धकुञ्जिकास्तोत्रम्

शिव उवाच

शृणु देवि प्रवक्ष्यामि कुञ्जिकास्तोत्रमुत्तमम् । येन मन्त्रप्रभावेण चण्डीजापः शुभो भवेत् ।।१।।
न कवचं नार्गलास्तोत्रं कीलकं न रहस्यकम् । न सूक्तं नापि ध्यानं च न न्यासो न च वार्चनम् ।।२।।
कुञ्जिकापाठमात्रेण दुर्गापाठफलं लभेत् । अति गुह्यतरं देवि देवानामपि दुर्लभम् ।।३।।
गोपनीयं प्रयत्नेन स्वयोनिरिव पार्वति । मारणं मोहनं वश्यं स्तम्भनोच्चाटनादिकम्।
पाठमात्रेण संसिद्ध्येत् कुञ्जिकास्तोत्रमुत्तमम् ।।४।।

अथ मन्त्रः

ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे ।। ॐ ग्लौं हुं क्लीं जूं सः ज्वालय ज्वालय ज्वल ज्वल प्रज्वल प्रज्वल ऐं ह्रीं क्लीं चामुण्डायै विच्चे ज्वल हं सं लं क्षं फट् स्वाहा

।। इतिमन्त्रः।।

नमस्ते रुद्ररूपिण्यै नमस्ते मधुमर्दिनि । नमः कैटभहारिण्यै नमस्ते महिषार्दिनि ।।१।।
नमस्ते शुम्भहन्त्र्यै च निशुम्भासुरघातिनि ।।२।।

जाग्रतं हि महादेवि जपं सिद्धं कुरुष्व मे । ऐंकारी सृष्टिरूपायै ह्रींकारी प्रतिपालिका।।३।।
क्लींकारी कामरूपिण्यै बीजरूपे नमोऽस्तु ते । चामुण्डा चण्डघाती च यैकारी वरदायिनी ।।४।।
विच्चे चाभयदा नित्यं नमस्ते मन्त्ररूपिणि ।।५।।
धां धीं धूं धूर्जटेः पत्नी वां वीं वूं वागधीश्वरी । क्रां क्रीं क्रूं कालिका देवि शां शीं शूं मे शुभं कुरु ।।६।।
हुं हुं हुंकाररूपिण्यै जं जं जं जम्भनादिनी । भ्रां भ्रीं भ्रूं भैरवी भद्रे भवान्यै ते नमो नमः ।।७।।
अं कं चं टं तं पं यं शं वीं दुं ऐं वीं हं क्षं । धिजाग्रं धिजाग्रं त्रोटय त्रोटय दीप्तं कुरु कुरु स्वाहा।।
पां पीं पूं पार्वती पूर्णा खां खीं खूं खेचरी तथा ।।८।।
सां सीं सूं सप्तशती देव्या मन्त्रसिद्धिं कुरुष्व मे । इदं तु कुञ्जिकास्तोत्रं मन्त्रजागर्तिहेतवे ।।
अभक्ते नैव दातव्यं गोपितं रक्ष पार्वति । यस्तु कुञ्जिकया देवि हीनां सप्तशतीं पठेत् ।।
न तस्य जायते सिद्धिररण्ये रोदनं यथा ।।

इति श्रीरुद्रयामले गौरीतन्त्रे शिवपार्वतीसंवादे कुञ्जिकास्तोत्रं सम्पूर्णम् ।

।। ॐ तत्सत् ।।

सप्तशतीका केही सिद्ध सम्पुट मन्त्र

श्रीमार्कण्डेय पुराणान्तर्गत देवी माहात्म्यको सात सय श्लोक धर्म, अर्थ, काम र मोक्ष - यी चारै पुरुषार्थ दिने तथा जुन साधकले जस्तो भावना र कामनाले विधिपूर्वक पारायण गर्दछ उसलाई इच्छित फल अवश्य प्राप्त हुन्छ । यसको अनुभव अगणित व्यक्तिहरूले प्रत्यक्ष गरिसकेका छन् । अतः तल लेखिएका मन्त्रहरूको विधिवत् पाठ गर्नाले अवश्य सिद्धि प्राप्त हुन्छ ॥

१- सामूहिक कल्याणको निम्ति-

देव्या यया ततमिदं जगदात्मशक्त्या
निश्शेषदेवगणशक्तिसमूहमूर्त्या ।
तामम्बिकामखिलदेवमहर्षिपूज्यां
भक्त्या नताः स्म विदधातु शुभानि सा नः"

२- संसारको अशुभ र भय निवारणका लागि-

यस्याः प्रभावमतुलं भगवाननन्तो
ब्रह्मा हरश्च न हि वक्तुमलं बलं च ।
सा चण्डिकाऽखिल-जगत्परिपालनाय
नाशय चाऽशुभभयस्य मतिं करोतु ॥

३- विश्वको रक्षाका लागि-

या श्रीः स्वयं सुकृतिनां भवनेष्वलक्ष्मीः
पापात्मनां कृताधियां हृदयेषु बुद्धिः ।
श्रद्धा सतां कुलजन - प्रभवस्य लज्जा
तां त्वां नताः स्म परिपालय देवि विश्वम् ॥

४- रोग निवारणका लागि-

रोगानशेषानपहंसि तुष्टा
रुष्टा तु कामान् सकलानभीष्टान् ।

त्वामाश्रितानां न विपन्नराणां
त्वामाश्रिता ह्याश्रयतां प्रयान्ति ॥

५- दारिद्र्य - दुःख नाशका निम्ति -

दुर्गे स्मृता हरसि भीतिमशेषजन्तोः
स्वस्थैः स्मृता मतिमतीव शुभां ददासि ।
दारिद्र्य दुःख भयहारिणि का त्वदन्या
सर्वोपकारकरणाय सदाऽऽर्द्रचिता ॥

६. मोक्ष प्राप्तिको निम्ति-

त्वं वैष्णवी शक्तिरनन्तवीर्या
विश्वस्य बीजं परमाऽसि माया ।
सम्मोहितं देवि समस्तमेतत्
त्वं वै प्रसन्ना भुवि मुक्तिहेतुः ॥

७-विश्वको पाप-ताप निवारणका लागि-

देवि प्रसीद परिपालय नोऽरिभीते-
र्नित्यं यथा सुरवधादधुनैव सद्यः ।
पापानि सर्वजगतां प्रशमं नयाऽऽशु
उत्पातपाक-जनिताँश्च महोपसर्गान् ॥

८. विपत्ति नाशको निम्ति-

शरणागतदीनार्त - परित्राणपरायणे ।
सर्वस्यार्तिहरे देवि नारायणि नमोऽस्तु ते ॥

९. बाधा निवारणको निम्ति-

सर्वाबाधाप्रशमनं त्रैलोक्यस्याऽखिलेश्वरि ।
एवमेव त्वया कार्यमस्मद्वैरिविनाशनम् ॥

१०. भय नाशको लागि-

(क) ज्वालाकरालमत्युग्रमशेषासुरसूदनम् ।
त्रिशूलं पातु नो भीतेर्भद्रकालि नमोऽस्तु ते ॥

(ख) सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते ।
भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोऽस्तु ते ॥

(ग) एतत्ते वदनं सौम्यं लोचनत्रय - भूषितम् ।
पातु नः सर्वभीतिभ्यः कात्यायनि नमोऽस्तु ते ॥

११. धन-पुत्र प्राप्ति र बाधा निवारणका लागि-

सर्वाबाधाविनिर्मुक्तो धन -धान्यसुताऽन्वितः ।
मनुष्यो मत्प्रसादेन भविष्यति न संशयः ॥

१२.शक्ति प्राप्तिको निम्ति-

सृष्टि स्थिति विनाशानां शक्तिभूते सनातनि ।
गुणाश्रये गुणमये नारायणि नमोऽस्तु ते ॥

१३.रक्षाको निम्ति-

शूलेन पाहि नो देवि पाहि खड्गेन चाऽम्बिके ।
घण्टास्वनेन नः पाहि चापज्यानिःस्वनेन च ॥

१४.सबै प्रकारको कल्याणको निम्ति-

सर्वमङ्गलमांगल्ये शिवे सर्वार्थसाधिके ।
शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते ॥

१५. पाप नाशको निम्ति-

हिनस्ति दैत्यतेजांसि स्वनेनाऽऽपूर्य या जगत् ।
सा घण्टा पातु नो देवि पापेभ्योऽनः सुतानिव ॥

१६. स्वर्ग र मुक्तिको लागि -

सर्वभूता यदा देवी स्वर्गमुक्तिप्रदायिनी ।
त्वं स्तुता स्तुतये का वा भवन्तु परमोक्तयः ॥

१७. मोक्ष प्राप्तिको निम्ति-

सर्वस्य बुद्धिरूपेण जनस्य हृदि संस्थिते ।
स्वर्गापवर्गदे देवि नारायणि नमोऽस्तु ते ॥

१८. सबै विद्या र समस्त स्त्रीजातिमा मातृभाव प्राप्तिको निम्ति-

विद्याः समस्तास्तव देवि भेदाः
स्त्रियः समस्ताः सकला जगत्सु ।
त्वयैकया पूरितमम्बयैतत्
का ते स्तुतिः स्तव्यपरा परोक्तिः ॥

१९. हर्ष प्राप्तिको लागि-

प्रणतानां प्रसीद त्वं देवि विश्वार्तिहारिणि ।
त्रैलोक्यवासिनामीड्ये लोकानां वरदा भव ॥

२०. विश्वको अभ्युदयको निम्ति-

विश्वेश्वरि त्वं परिपासि विश्वं
विश्वात्मिका धारयसीति विश्वम् ।

विश्वेशवन्द्या भवती भवन्ती
विश्वाश्रया ते त्वयि भक्तिनम्राः ॥

२१. संसारको पाप-ताप नाशको लागि-

देवि प्रपन्नार्तिहरे प्रसीद
प्रसीद मातर्जगतोऽखिलस्य ।
प्रसीद विश्वेश्वरि पाहि विश्वं
त्वमीश्वरी देवि चराऽचरस्य ॥

२२. शत्रु निवारणको निम्ति -

सर्वाबाधाप्रशमनं त्रैलोक्यस्याऽखिलेश्वरि ।
एवमेव त्वया कार्यमस्मद्वैरिविनाशनम् ॥

॥ इति समाप्ता श्रीदुर्गासप्तशती ॥

अथ सप्तशती होमप्रयोगः

अथ होमार्थे द्वितीयातो नित्यपूजा-विधिः ॥ अस्मिन् दीपकलशगणेशघण्टशंखरक्षा-स्थापनस्थाने प्रथमदिनस्थापितान् तान् अद्य केवलं चन्दनाक्षतपुष्पहस्तेन स्पृशन् पूजयेदेव ॥ अतोऽधःस्थात् "ततः पीठपूजां कुर्यात्" तः पूजा कार्या ॥

शुभदिने स्नातः शुचिः सपत्नीको यजमानः पूर्णकलशं हस्ते आदाय मण्डपं प्रदक्षिणी-कृत्य पश्चिमद्वारेण प्रविश्योपविश्य, आचम्य कुशतिलयवजलमादाय— ॐ तत्सत् ३, ॐ विष्णुः ३, अद्येहेत्यादि देशकालौ स्मृत्वा ममेहजन्मनि जन्मान्तरे वा दुर्गाप्रीतिद्वारा सर्वापच्छान्तिपूर्वकं दीर्घायुर्विपुल-धन-धान्य-पुत्र- पौत्राद्यनवच्छिन्न-सन्तति-स्थिरलक्ष्मी-कीर्ति-लाभ-शत्रुपराजय-सदभीष्टसिद्ध्यर्थम् ममाऽमुककार्यसिद्ध्यर्थं वा सनवग्रहमखां नवचण्डीम्, शतचण्डीम्, सहस्रचण्डीम्, लक्षचण्डीम् वा यथा-संख्येन ब्राह्मणद्वारा करिष्ये, तदङ्गतया दीप-कलश-गणेशपूजनम्, पुण्याहवाचनम्,

मातृकापूजनम्, नान्दीश्राद्धमाचार्याऽऽदिवरणम् च करिष्ये॥ इति संकल्प्य तानि कृत्वा आचर्यादीन् वृत्वा यथाविभवं वस्त्रादिना संपूज्य प्रार्थयेच्च ॥ "(ते च शतचण्ड्यां दश, सहस्रचण्ड्यां शतम् । केचिदत्र ग्रह-जपार्थमेकमृत्विजं वरयन्ति।)"

अथ आचार्यः 'आचम्य देशकालौ संकीर्त्य यजमानेन वृतोऽहमाचार्यकर्म करिष्ये।' इति संकल्प्य यत्रतत्रेति गौरसर्षपान् विकीर्य पञ्चगव्येन कुशोदकेन वा मण्डपं प्रोक्षेत्-

ॐ अपवित्रः पवित्रो वा सर्वाऽवस्थाङ्गतोऽपि वा ।
यः स्मरेत् पुण्डरीकाक्षं स बाह्याऽभ्यन्तरः शुचिः॥

तत आसनशुद्धिः-

ॐ पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता ।
त्वं च धारय मां देवि पवित्रं कुरु चाऽऽसनम् ॥

इत्युपविश्य-ॐ अनन्ताऽऽसनाय नमः, ॐ विमलाऽऽसनाय नमः, ॐ पद्माऽऽसनाय नमः ॥

अपक्रामन्तु भूतानि पिशाचाः सर्वतो दिशम् ।
सर्वेषामविरोधेन पूजाकर्म समारभे ॥

इति भूमौ वामपादघातत्रयं कृत्वा, यथोपदेशं भूशुद्ध्यादि कृत्वा नवार्णविध्युक्त-न्यासं कुर्यात् । ततो योनिमुद्रां प्रदर्श्य ध्यायेत्- तत्र ध्यानम्-

ॐ श्वेताऽऽनना नीलभुजा सुश्वेतस्तनमण्डला ।
रक्तमध्या रक्तपादा नीलजङ्घोरुरुन्मदा ॥
सुचित्रजघना चित्रमाल्याम्बरविभूषणा ।
चित्राऽनुलेपना कान्तिरूपसौभाग्यशालिनी ॥
अष्टादशभुजा पूज्या सा सहस्रभुजा सती ।
आयुधान्यत्र वक्ष्यन्ते दक्षिणाऽधः-करक्रमात् ॥
अक्षमाला च कमलं बाणोऽसिः कुलिशं गदा ।

चक्रं त्रिशूलं परशुः शंखो घण्टा च पाशकः।
शक्तिर्दण्डश्चर्म चापं पानपात्रं कमण्डलुः॥

ततो वेद्यां सर्वतोभद्रमष्टदलं वा विलिख्य तत्र ब्रह्मादि मण्डलदेवताः संस्थाप्य तन्मध्ये- महीद्यौः चनऽइमं० इत्यादिमन्त्रैः कलशं संस्थाप्य तस्मिन् गन्ध-पुष्प-फल-सर्वौषधि-दूर्वा- पञ्चपल्लव-सप्तमृत्तिकास्तत्तन्मन्त्रेण निक्षिप्य तथा वस्त्रद्वयेनाऽऽवेष्ट्य तदुपरि पूर्णपात्रं निधाय कलशे वरुणमावाह्य पूजयेत् ॥ ततः कलशं संस्पृश्य कलशदेवताः स्मरेत्-

ॐ कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः।
मूले त्वस्य स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः॥
कुक्षौ तु सागराः सप्त सप्त द्वीपा वसुन्धरा ।
ऋग्वेदोऽथ यजुर्वेदः सामवेदो ह्यथर्वणः ।
अङ्गैश्च सहिताः सर्वे कलशं तु समाश्रिताः ॥

अथ कलशप्रार्थना-

ॐ देव-दानवसंवादे मथ्यमाने महोदधौ ।
उत्पन्नोऽसि तदा कुम्भ विधृतो विष्णुना स्वयम् ।।
त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः ।
त्वयि तिष्ठन्ति भूतानि त्वयि प्राणाः प्रतिष्ठिताः ।।
शिवः स्वयं त्वमेवाऽसि विष्णुस्त्वं च प्रजापतिः ।
आदित्या वसवो रुद्रा विश्वेदेवा सपैतृकाः ।।
त्वयि तिष्ठन्ति सर्वेऽपि यतः कामफलप्रदाः ।
त्वत्प्रसादादिमां पूजां कर्तुमीहे जलोद्भव ।
सान्निध्यं कुरु मे देव प्रसन्नो भव सर्वदा ।।

ततः कलशोपरिस्थपूर्णपात्रे वस्त्रं प्रसार्य वा ताम्रस्थाल्यां यन्त्रं लिखेत्। तद्यथा- — मध्ये त्रिकोणम्, तद्बहिः षट्कोणम्, तद्बाह्ये वृत्तम्, तद्बाह्येऽष्टौ दलानि,

तद्बाह्ये चतुर्द्वारम्, चतुरस्त्रमिति । एवं यन्त्रं विलिख्य तत्राऽष्टादशभुजां वा सिंहाऽऽरूढां सौवर्णीं देवमूर्तिं प्राणप्रतिष्ठापूर्वकं प्रतिष्ठाप्य पूजयेत् । तद्यथा- स्ववामे कर्पूरादि-युतजलपूर्णकलशं संपूज्य-

गङ्गे च यमुने चैव गोदावरि सरस्वति ।
नर्मदे सिन्धु- काबेरी जलेऽस्मिन् सन्निधिं कुरु ।।

इति पठित्वा कलशमुद्रां प्रदर्श्य दक्षिणतः शङ्खं पूजयेत्-

शङ्खं चन्द्राऽर्कदैवत्यं कुक्षौ वरुणदेवता ।
पृष्ठे प्रजापतिश्चैव अग्रे गङ्गा सरस्वती ।।
त्रैलोक्ये यानि तीर्थानि वासुदेवस्य चाऽऽज्ञया ।
शंखे तिष्ठन्ति सर्वाणि तस्मात् शंख प्रपूज्यसे ।।
त्वं पुरा सागरोत्पन्नो विष्णुना विधृतः करे ।
निर्मितः सर्वदेवैश्च पाञ्चजन्य नमोऽस्तु ते ।।

"पाञ्चजन्याय विद्महे, पवनाय धीमहि, तन्नः शङ्खः प्रचोदयात्" इति पठित्वा शखमुद्रां प्रदर्श्य शङ्खोदकेनाऽऽत्मानं पूजाद्रव्याणि च प्रोक्षेत्- ॐ अपवित्रः पवित्रो वा० इति।।

ततः पीठपूजां कुर्यात्-(प्रति नमसि चन्दनाक्षतपुष्पैः)

देव्या दक्षिणे- गुं गुरुभ्यो नमः । पं परमगुरुभ्यो नमः । पं परात्परगुरुभ्यो नमः । पं परमेष्ठिगुरुभ्यो नमः । वामे– गं गणपतये नमः । दुं दुर्गायै नमः । क्षं क्षेत्रपालाय नमः ।। मध्ये– आधारशक्त्यै नमः । मूलप्रकृत्यै नमः । कालाग्निरुद्राय नमः । महामण्डूकाय नमः । कूर्म्माय नमः । वराहाय नमः । अनन्ताय नमः । भूम्यै नमः । अमृताऽर्णवाय नमः । रत्नद्वीपाय नमः । हेमगिरये नमः । नन्दनोद्यानाय नमः । मणिभूम्यै नमः । रत्नमण्डपाय नमः । कल्पतरवे नमः । रत्नसिंहासनाय नमः । आग्नेयादिकोणेषु–धर्माय नमः । ज्ञानाय नमः । वैराग्याय नमः । ऐश्वर्याय नमः । अधर्माय नमः । अज्ञानाय नमः । अवैराग्याय नमः । अनैश्वर्याय नमः ।। ऊर्ध्वम्–

- ब्रह्मणे नमः ।। अधः– अनन्ताय नमः ।। मध्ये– वास्तुपुरुषाय नमः। सं सत्त्वाय नमः । रं रजसे नमः । तं तमसे नमः । मां मायायै नमः । विं विद्यायै नमः। पूर्वाद्यष्टदिक्षु- उड्डाणपीठेश्वरसहिताम्, उड्डाणपीठेश्वर्यम्बापादुकां पूजयामि । मातृकापीठेश्वरसहितां मातृकापीठेश्वर्यम्बापादुकां पूजयामि । जालन्धर पीठेश्वरसहितां जालन्धरपीठेश्वर्यम्बापादुकां पूजयामि । कोल्लागिरिपीठेश्वरसहिताम् कोल्लागिरिपीठेश्वर्यम्बापादुकां पूजयामि । पूर्णगिरिपीठेश्वरसहिताम्, पूर्णगिरिपीठेश्वर्यम्बापादुकां पूजयामि । संहारगिरिपीठेश्वरसहिताम् संहारगिरिपीठेश्वर्यम्बापादुकां पूजयामि । कोहलापुरपीठेश्वरसहिताम् कोहलापुरपीठेश्वर्यम्बापादुकां पूजयामि । कामरूपपीठेश्वरसहिताम् कामरूपपीठेश्वर्यम्बापादुकां पूजयामि ।।

पुनः पूर्वादिचतुर्दिक्षु– गं गणेशाय नमः । क्षं क्षेत्रपालाय नमः । पां पादुकाभ्यो नमः। बं बटुकेभ्यो नमः। आग्नेयादिदिक्षु– जं जयायै नमः । विं विजयायै नमः ।

जं जयन्त्यै नमः। अं अपराजितायै नमः। तत्रैव— अग्निमुखवेतालाय नमः। प्रेतवाहनवेतालाय नमः। ज्वालामुखवेतालाय नमः। धूम्राक्षवेतालाय नमः। कन्दाय नमः। नीलाय नमः। दलेभ्यो नमः। केसरेभ्यो नमः। कर्णिकायै नमः। अं सूर्यमण्डलाय नमः। उं सोममण्डलाय नमः। वं वह्निमण्डलाय नमः। आं आत्मने नमः। उं अन्तरात्मने नमः। पं परमात्मने नमः। उं ज्ञानात्मने नमः। विं विष्णुमायायै नमः। चें चेतनायै नमः। बुं बुद्ध्यै नमः। निं निद्रायै नमः। क्षुं क्षुधायै नमः। छां छायायै नमः। शं शक्त्यै नमः। तृं तृष्णायै नमः। क्षां क्षान्त्यै नमः। जां जात्यै नमः। लं ललितायै नमः। शां शान्त्यै नमः। श्रं श्रद्धायै नमः। कां कान्त्यै नमः। लं लक्ष्म्यै नमः। धृं धृत्यै नमः। वं वृद्ध्यै नमः। स्मृं स्मृत्यै नमः। दं दयायै नमः। तुं तुष्ट्यै नमः। पुं पुष्ट्यै नमः। मां मातृकायै नमः। भ्रां भ्रान्त्यै नमः। ह्रीं सर्वशक्तिकमलाऽऽसनाय नमः। सर्वात्मसंसर्ग-योगपीठात्मने नमः। इति पीठ-पूजा ॥

अथ स्थापितमूर्तौ देवीमावाहयेत्

आगच्छ वरदे देवि दैत्यदर्पनिषूदनि ।
पूजां गृहाण सुमुखि ! नमस्ते शङ्करप्रिये ॥
दुर्गे देवि! समागच्छ सान्निध्यमिह कल्पय ।
बलिं पूजां गृहाण त्वमष्टाभिः शक्तिभिः सह ॥

इति देवीमावह्य मूलमन्त्रेण "जयन्ती मङ्गला काली०" इत्यनेन वा आसन-पाद्याऽर्घ्याऽऽ चमन-मुधुपर्कान् निवेदयेत् ॥

ततः पञ्चामृतस्नानम्— देवीसूक्त-श्रीसूक्त-सरस्वतीसूक्तैर्देवीमाहात्म्योक्तैः- "शक्रादयः सुरगणाः०" इत्यादि स्तोत्रैश्चाऽभिषेकः ॥ ततः पूर्वोक्तमन्त्रेण वस्त्र-कञ्चुकाऽऽभरणाऽष्टगन्ध- विल्वपत्र- नाना पुष्प- हरिद्रा- कुंकुम- सिन्दूराऽऽलक्तक- परिमलद्रव्याणि च यथाशक्ति समर्पयेत् ॥

अथाऽङ्गपूजा- ॐ दुर्गायै नमः, पादौ पूजयामि । ॐ गिरिजायै नमः, गुल्फौ पूजयामि । ॐ अपर्णायै नमः, जानुनी पूजयामि । ॐ हरिप्रियायै नमः, उरू पूजयामि । ॐ पार्वत्यै नमः, कटिं पूजयामि । ॐ आर्यायै नमः, नाभिं पूजयामि । ॐ जगन्मात्रे नमः, उदरं पूजयामि । ॐ मङ्गलायै नमः, कुक्षिं पूजयामि । ॐ शिवायै नमः, हृदयं पूजयामि । ॐ माहेश्वर्यै नमः, कण्ठं पूजयामि । ॐ विश्ववन्द्यायै नमः, स्कन्धौ पूजयामि । ॐ काल्यै नमः, बाहू पूजयामि । ॐ आद्यायै नमः, हस्तौ पूजयामि । ॐ वरदायै नमः, मुखं पूजयामि । ॐ सुवाण्यै नमः, नासिकां पूजयामि । ॐ कमलाक्ष्यै नमः, नेत्रे पूजयामि। ॐ अम्बिकायै नमः, शिरः पूजयामि । ॐ देव्यै नमः, सर्वाङ्गं पूजयामि ।।

अथ अष्टोत्तरशतनामभिः पूजयेत्— ॐ माहेश्वर्यै नमः । ॐ महादेव्यै नमः । ॐ जयन्त्यै नमः । ॐ सर्वमङ्गलायै नमः । ॐ लज्जायै नमः । ॐ भगवत्यै नमः। ॐ वन्द्यायै नमः ; ॐ भवान्यै नमः । ॐ पापनाशिन्यै नमः । ॐ चण्डिकायै नमः। ॐ कालरात्र्यै नमः । ॐ भद्रकाल्यै नमः । ॐ अपराजितायै नमः । ॐ महाविद्यायै

नमः । ॐ महामेधायै नमः । ॐ महामायायै नमः । ॐ महाबलायै नमः । ॐ कात्यायन्यै नमः । ॐ जयायै नमः । ॐ दुर्गायै नमः । ॐ मन्दार- वनवासिन्यै नमः। ॐ आर्यायै नमः । ॐ गिरिसुतायै नमः । ॐ धात्र्यै नमः। ॐ महिषासुर-घातिन्यै नमः । ॐ सिद्धिदायै नमः । ॐ बुद्धिदायै नमः । ॐ नित्यायै नमः । ॐ वरदायै नमः । ॐ वरवर्णिन्यै नमः । ॐ अम्बिकायै नमः । ॐ सुखदायै नमः । ॐ सौम्यायै नमः । ॐ जगन्मात्रे नमः । ॐ शिवप्रियायै नमः । ॐ भक्तसन्तापसंहन्त्र्यै नमः । ॐ सर्वकामप्रपूरिण्यै नमः । ॐ जगत्कर्त्र्यै नमः । ॐ जगद्धात्र्यै नमः । ॐ जगत्पालनतत्परायै नमः । ॐ अव्यक्तायै नमः । ॐ व्यक्तरूपायै नमः । ॐ भीमायै नमः । ॐ त्रिपुरसुन्दर्यै नमः । ॐ अपर्णायै नमः । ॐ ललितायै नमः । ॐ वेद्यायै नमः । ॐ पूर्णचन्द्रनिभाऽऽननायै नमः । ॐ चामुण्डायै नमः । ॐ चतुरायै नमः। ॐ चन्द्रायै नमः । ॐ गुणत्रयविभाविन्यै नमः । ॐ हेरम्बजनन्यै नमः । ॐ काल्यै नमः । ॐ त्रिगुणायै नमः । ॐ यशोधारिण्यै नमः । ॐ उमायै नमः । ॐ

कलशमस्तायै नमः । ॐ दैत्यदर्पनिषूदिन्यै नमः । ॐ बुद्ध्यै नमः । ॐ कान्त्यै नमः। ॐ क्षमायै नमः । ॐ शान्त्यै नमः । ॐ तुष्ट्यै नमः । ॐ पुष्ट्यै नमः । ॐ धृत्यै नमः । ॐ मत्यै नमः । ॐ वराऽऽयुधधरायै नमः । ॐ धीरायै नमः । ॐ गौर्यै नमः । ॐ शाकम्भर्य्यै नमः । ॐ शिवायै नमः । ॐ अष्टसिद्धिप्रदायै नमः । ॐ वामायै नमः । ॐ शिव-वामाङ्गवासिन्यै नमः । ॐ धर्मदायै नमः। ॐ धनदायै नमः । ॐ श्रीदायै नमः । ॐ कामदायै नमः । ॐ मोक्षदायै नमः । ॐ अपरायै नमः। ॐ चित्स्वरूपिण्यै नमः । ॐ चिदानन्दायै नमः । ॐ जयश्रियै नमः । ॐ जयदायिन्यै नमः । ॐ सर्वमङ्गलमाङ्गल्यायै नमः । ॐ जगत्त्रयहितैषिण्यै नमः । ॐ शर्वाण्यै नमः । ॐ पार्वत्यै नमः । ॐ धान्यायै नमः । ॐ स्कन्दमात्रे नमः । ॐ अखिलेश्वर्यै नमः । ॐ प्रपन्नार्तिहरायै नमः । ॐ देव्यै नमः । ॐ सुभगायै नमः । ॐ कामरूपिण्यै नमः । ॐ निराकारायै नमः । ॐ साकारायै नमः । ॐ महाकाल्यै नमः । ॐ सुरेश्वर्यै नमः । ॐ शर्वायै नमः । ॐ श्रद्धायै नमः । ॐ ध्रुवायै नमः ।

ॐ कृत्यायै नमः । ॐ मृडान्यै नमः । ॐ भक्तवत्सलायै नमः। ॐ सर्वशक्ति समायुतायै नमः । ॐ शरण्यायै नमः । ॐ सर्वकामदायै नमः ।।इति।।

अथ आवरण-पूजा

देव्या दक्षिणे– ॐ ऐं महाकाल्यै विच्चे नमः । वामे– ॐ ह्रीं महालक्ष्म्यै विच्चे नमः । अग्रे– ॐ क्लीं महासरस्वत्यै विच्चे नमः । वामे– ॐ ह्रूं महिषाय नमः। दक्षिणे–ॐ क्षौं सिंहाय नमः । अग्रे– ॐ गं गणपतये नमः । ॐ ह्रूं कालाय नमः । पश्चात्– ॐ ह्रूं मृत्यवे नमः। षट्दलेषु —ॐ ह्रौं रुद्राय नमः । ॐ ह्रौं गौर्यै नमः । ॐ श्रीं विष्णवे नमः । ॐ श्रीं लक्ष्म्यै नमः । ॐ ऐं ब्रह्मणे नमः । ॐ ऐं सरस्वत्यै नमः । तत्रैव– ॐ ह्रां हृदयाय नमः । ॐ ह्रीं शिरसे स्वाहा। ॐ ह्रः शिखायै वषट् । ॐ ह्रैं कवचाय हुं । ॐ ह्रौं नेत्रत्रयाय वौषट् । ॐ ह्रः अस्त्राय फट् ।। पुनस्तत्रैव– ॐ गुं गुरुभ्यो नमः। ॐ पं परमगुरुभ्यो नमः । ॐ पं परमेष्ठिगुरुभ्यो नमः । ॐ हरये नमः । ॐ हराय नमः । ॐ गणेशाय नमः ।। तत्रैव– ॐ नन्दजायै

नमः । ॐ रक्तदन्तिकायै नमः । ॐ शाकंभर्यै नमः । ॐ दुर्गायै नमः । ॐ भीमायै नमः । ॐ भ्रामर्यै नमः ।। अथाऽष्टदलेषु— ॐ ब्राह्म्यै नमः। ॐ माहेश्वर्यै नमः । ॐ कौमार्यै नमः । ॐ वैष्णव्यै नमः । ॐ वाराह्यै नमः। ॐ इन्द्राण्यै नमः । ॐ नारसिंह्यै नमः । ॐ चामुण्डायै नमः । अथ पूर्वादिदिक्षु— ॐ अं असिताङ्गभैरवाय नमः । ॐ रुं रुरुभैरवाय नमः । ॐ चं चण्डभैरावाय नमः । ॐ क्रों क्रोधभैरवाय नमः । ॐ उं उन्मत्तभैरवाय नमः । ॐ कं कपालभैरवाय नमः । ॐ भीं भीषणभैरवाय नमः । ॐ सं संहारभैरवाय नमः । पुनः पूर्वाऽऽग्नेयदिक्षु— ॐ लं इन्द्राय नमः । ॐ रं अग्नये नमः । ॐ यं यमाय नमः । ॐ षं निर्ऋतये नमः । ॐ वं वरुणाय नमः। ॐ यं वायवे नमः । ॐ सं सोमाय नमः । ॐ हं ईशानाय नमः । तद्बहिः- पूर्वादिक्रमेण- ॐ वज्राय नमः । ॐ शक्त्यै नमः । ॐ दण्डाय नमः । ॐ खड्गाय नमः । ॐ पाशाय नमः । ॐ अङ्कुशाय नमः । ॐ गदायै नमः । ॐ त्रिशूलाय नमः ।। इत्यावरणपूजा ।।

ततः पूर्वोक्तमन्त्रेण धूप- दीप- नैवेद्यादिमन्त्रपुष्पान्त-पूजां कृत्वा-

ॐ नमो देव्यै महादेव्यै शिवायै सततं नमः ।
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम् ।।

इति नमस्कृत्य यथासंभवं छत्र- चामर- गीत- नृत्य-वाद्यादि समर्प्य कूष्माण्ड- नारिकेल- कदलीफलादि बलिं दत्त्वा-

मन्त्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वरि ।
यत्पूजितं मया देवि प्रसीद परमेश्वरि ।।
आवाहनं न जानामि न जानामि विसर्जनम् ।
पूजां चैव न जानामि प्रसीद परमेश्वरि ।।

अनेन पूजनेन श्रीमहाकाली- महालक्ष्मी- महासरस्वत्यः प्रीयन्ताम्।।

अथ कुमारी-पूजा- "देशकालौ संकीर्त्य सप्तशतीचण्डी-जपाङ्गत्वेन कुमारीपूजां करिष्ये" इति संकल्प्य मूलेन षडङ्गं कृत्वा मूलमन्त्रमुच्चार्य—

मन्त्राऽक्षरमयीं देवीं मातृणां रूपधारिणीम् ।
नवदुर्गात्मिकां साक्षात् कन्यामावाहयाम्यहम् ।।

इति कुमारीमावाह्य यथासंभवं पूजयेत् । कुमार्यश्च प्रत्यहं शतं, नव, एका वा यथाशक्ति वा पूज्याः। प्रत्यहं एकवृद्ध्या वा पूजयेत् ।।

ततो ब्राह्मणसुवासिनी– पूजा–एवं देवी-कुमार्यादीनां पूजा प्रत्यहं कार्या ।। ततः सर्वे विप्राः कृतन्यासाः शतं नवार्णमन्त्रं जप्त्वा कवचाऽर्गलकीलकानि सकृज्जप्त्वा सप्तशतीं जप्त्वा अन्ते रहस्यादि नवार्णं शतं च जपेयुः । एकस्मिन् दिने अनेकावृत्तिषु तु कवचाऽऽदीनां न प्रत्यावृत्तिः । एवम् ऋत्विजः प्रथमदिने एकम्, द्वितीये द्वे, तृतीये त्रीणि, चतुर्थे चत्वारि रूपाणि, इत्येवं जपं कुर्युः । ऋत्विजां यजमानस्य च प्रत्यहम् क्षीरमात्राऽशनम् । अशक्तौ हविष्यान्नं वा । प्रत्यहं सहस्रं, शतं, दश वा ब्राह्मणान् भोजयेत् । अन्यपर्वणि पंचमदिने होमः। किन्तु नवरात्रे तु नवम्यामेव होमः । केचित्तु अष्टम्याम् आरभ्य नवम्यां समापयन्ति ।।

अथ नवम्यां होमः

'ॐ तत्सदादि देशकालौ स्मृत्वा मया ब्राह्मणद्वारा कृतस्य सप्तशती चण्डी जप (पाठ) स्य सम्पूर्णता सिद्ध्यर्थं जपदशांशेन तिलादिमिश्रितपायसद्रव्येण होमं करिष्ये' इति संकल्प्य, पुण्याहवाचनं कृत्वा, अग्निस्थापनविधिना स्थण्डिलमुपलिप्योल्लिख्य तत्र (शत) मङ्गलनामानमग्निं प्रतिष्ठाप्य समिध्य ध्यायेत्–।

ततोऽग्निसमीपमागत्याऽन्वाधानम् कुर्यात् । समिद्द्वयमादाय एतस्मिन् क्रियमाणे शतचण्डीजपाङ्गहोमे देवतापरिग्रहार्थमन्वाधानं करिष्ये, अस्मिन्नन्वाहितेऽग्नावित्यादि चक्षुषी आज्येनेत्यन्तमुक्त्वा आदित्यादिनवग्रहान्, प्रतिद्रव्यमष्टाविंशतिसंख्याकाभिरष्टाभिर्वा समित्तिलाऽऽज्याहुतिभिः अधिदेवताः प्रत्यधिदेवताश्च चतुः संख्याकाभिस्तैरेव द्रव्यैर्गणपतिचतुष्टयम्, इन्द्राद्यष्टौ, लोकपालाँश्चैकैकया समित्तिला ऽऽज्याऽऽहुत्या यक्षे, महाकाली- महालक्ष्मी- महासरस्वतीमूलमन्त्रेण शतवारं सप्तशती- मन्त्रैः,

जपदशांश-संख्यया पायस- तिल- पलाश- पुष्प- सर्षप- पूगीफल- लाजा- दूर्वाङ्कुर- यव- विल्वफल- रक्तचन्दन- गुग्गुलद्रव्यैर्यथालाभद्रव्यैर्वा तिलमिश्रपायसेन वा पुनर्मूलमन्त्रेण शतवारं तैरेव द्रव्यैः आधारशक्त्यादिपीठदेवताः, महाकाल्याद्यावरण देवताश्चैकैकाऽऽहुत्या पायसाऽऽज्येन यक्षे । शेषेण स्विष्टकृतमित्याद्याज्यभागान्तं कृत्वा, यजमानः इदं हवनीयद्रव्यम् यथादैवतमस्तु न मम इति त्यजेत् ॥

नवग्रहादिभ्यः समित्तिलाऽऽज्यानि हुत्वा उक्तद्रव्याणि पुनर्मूलमन्त्रेण शतवारं वा सप्तशतीमन्त्रजपदशांशेन हुत्वा पुनर्मूलमन्त्रेण शतवारं जुहुयात् । मूलमन्त्रम् तु नवार्णव-मन्त्रम्– 'ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे' इति । नवार्णवमन्त्रस्य केवलाऽऽज्येनैव होमः । अथ दुर्गासप्तशत्याः प्रतिमन्त्रान्ते "दुर्गादेव्यै नमः इदं दुर्गादेव्यै"अथवा 'दुर्गादेव्यै नमः स्वाहा इदं दुर्गा देव्यै' उच्चरन् समस्तमन्त्रेण होमः ॥ अत्राऽध्याय समाप्तौ, उवाच स्थले च पत्रपुष्पफलैर्होमः ॥

एवं प्रधानहोमं कृत्वा पीठदेवताभ्यो नामभिः आज्यं पायसं वा जुहुयात्– ॐ आधारशक्त्यै नमः । ॐ मूलप्रकृत्यै नमः । ॐ कालाग्निरुद्राय नमः । ॐ महामण्डूकाय नमः । ॐ कूर्माय नमः । ॐ वराहाय नमः । ॐ अनन्ताय नमः। ॐ भूम्यै नमः । ॐ अमृतार्णवाय नमः । ॐ रत्नदीपाय नमः । ॐ हेमगिरये नमः । ॐ नन्दनोद्यानाय नमः । ॐ मणिभूम्यै नमः । ॐ रत्नमण्डपाय नमः । ॐ कल्पतरवे नमः । ॐ रत्नसिंहासनाय नमः । ॐ धर्माय नमः । ॐ ज्ञानाय नमः । ॐ वैराग्याय नमः । ॐ ऐश्वर्याय नमः । ॐ अधर्माय नमः । ॐ अज्ञानाय नमः । ॐ अवैराग्याय नमः । ॐ अनैश्वर्याय नमः । ॐ ब्रह्मणे नमः । ॐ अनन्ताय नमः । ॐ वास्तुपुरुषाय नमः । ॐ सं सत्त्वाय नमः । ॐ रं रजसे नमः । ॐ तं तमसे नमः । ॐ मां मायायै नमः । ॐ विं विद्यायै नमः । ॐ उड्डाणपीठेश्वर- सहितोड्डाणपीठेश्वर्यम्बायै नमः । ॐ मातृकापीठेश्वर-सहितमातृकापीठेश्वर्यम्बायै नमः । ॐ जालन्धर-पीठेश्वर-सहितजालन्धरपीठेश्वर्यम्बायै नमः । ॐ कोल्लागिरि-पीठेश्वर-सहितकोल्लागिरि पीठेश्वर्यम्बायै नमः । ॐ पूर्णगिरि-पीठेश्वरसहित-पूर्णगिरि-पीठेश्वर्यम्बायै नमः ।

ॐ संहार - गिरिपीठेश्वरसहित - संहारगिरिपीठेश्वर्यम्बायै नमः। ॐ कोहलापुरिपीठेश्वर सहितकोहलापुरपीठेश्वर्यम्बायै नमः । ॐ कामरूपपीठेश्वरसहितकामरूपपीठेश्वर्यम्बायै नमः । ॐ गं गणेशाय नमः । ॐ क्षं क्षेत्रपालाय नमः । ॐ पां पादुकाभ्यो नमः। ॐ बं बटुकेभ्यो नमः । ॐ जं जयायै नमः । ॐ विं विजयायै नमः । ॐ जं जयन्त्यै नमः । ॐ अं अपराजितायै नमः । ॐ अग्निमुखवेतालाय नमः । ॐ प्रेतवाहनवेतालाय नमः । ॐ ज्वालामुखवेतालाय नमः । ॐ धूम्राक्षवेतालाय नमः । ॐ स्कन्दाय नमः । ॐ नीलाय नमः । ॐ दलेभ्यो नमः । ॐ केसरेभ्यो नमः । ॐ कर्णिकायै नमः । ॐ सूर्यमण्डलाय नमः । ॐ उं सोममण्डलाय नमः । ॐ मं वह्निमण्डलाय नमः । ॐ अं आत्मने नमः । ॐ उं अन्तरात्मने नमः । ॐ पं परमात्मने नमः । ॐ उं ज्ञानात्मने नमः । ॐ विं विष्णुमायायै नमः । ॐ चें चेतनायै नमः । ॐ बं बुद्ध्यै नमः । ॐ निं निद्रायै नमः । ॐ क्षुं क्षुधायै नमः । ॐ छां छायायै नमः । ॐ शं शक्त्यै नमः । ॐ तृं तृष्णायै नमः । ॐ क्षां क्षान्त्यै नमः । ॐ जां जात्यै नमः । ॐ लं ललितायै नमः । ॐ शां शान्त्यै नमः । ॐ श्रं श्रद्धायै नमः । ॐ कां कान्त्यै

नमः । ॐ लं लक्ष्म्यै नमः । ॐ धृं धृत्यै नमः । ॐ वृं वृद्ध्यै नमः । ॐ स्मृं स्मृत्यै नमः । ॐ दं दयायै नमः। ॐ तुं तुष्ट्यै नमः । ॐ पुं पुष्ट्यै नमः । ॐ मां मातृकायै नमः । ॐ भ्रां भ्रान्त्यै नमः। ॐ ह्रीं सर्वशक्तिकमलासनाय नमः । ॐ सर्वात्मसंसर्गयोगपीठात्मने नमः ॥ इति पीठदेवताहोमः॥

अथाऽऽवरणदेवताः– ॐ ऐं महाकाल्यै विच्चे । ॐ ह्रीं महालक्ष्म्यै विच्चे । ॐ क्लीं महासरस्वत्यै विच्चे । ॐ ह्रूं महिषाय नमः। ॐ क्षं सिंहाय नमः। ॐ गं गणपतये नमः । ॐ हूं कालाय नमः । ॐ हैं मृत्यवे नमः। ॐ हैं रुद्राय नमः । ॐ ह्रौं गौर्यै नमः । ॐ श्रीं विष्णुवे नमः । ॐ श्रीं लक्ष्म्यै नमः । ॐ ऐं ब्रह्मणे नमः। ॐ ऐं सरस्वत्यै नमः । ॐ ह्रां हृदयाय नमः । ॐ ह्रीं शिरसे स्वाहा । ॐ ह्रूं शिखायै वषट् । ॐ ह्रैं कवचाय हुं । ॐ ह्रौं नेत्रत्रयाय वौषट् । ॐ ह्रः अस्त्राय फट् । ॐ गुं गुरुभ्यो नमः। ॐ पं परमगुरुभ्यो नमः । ॐ पं परमेष्ठिगुरुभ्यो नमः। ॐ हरये नमः। ॐ हराय नमः । ॐ गणेशाय नमः । ॐ नन्दजायै नमः। ॐ रक्तदन्तिकायै नमः । ॐ शाकम्भर्यै नमः । ॐ दुर्गायै नमः । ॐ भीमायै नमः । ॐ भ्रामर्यै नमः ।

ॐ ब्राह्म्यै नमः । ॐ माहेश्वर्यै नमः । ॐ कौमार्यै नमः । ॐ वैष्णव्यै नमः । ॐ वाराह्यै नमः । ॐ इन्द्राण्यै नमः । ॐ नारसिंह्यै नमः । ॐ चामुण्डायै नमः । ॐ असिताङ्गभैरवाय नमः । ॐ रुं रुरुभैरवाय नमः । ॐ चं चण्डभैरवाय नमः । ॐ क्रां क्रोधभैरवाय नमः । ॐ उं उन्मत्तभैरवाय नमः । ॐ कं कपालभैरवाय नमः । ॐ भीं भीषणभैरवाय नमः । ॐ सं संहारभैरवाय नमः । ॐ लं इन्द्राय नमः । ॐ रं अग्नये नमः । ॐ यं यमाय नमः । ॐ क्षं निर्ऋतये नमः । ॐ वं वरुणाय नमः । ॐ वं वायवे नमः । ॐ सं सोमाय नमः । ॐ हं ईशानाय नमः । ॐ वज्राय नमः । ॐ शक्त्यै नमः । ॐ दण्डाय नमः । ॐ खड्गाय नमः । ॐ पाशाय नमः । ॐ अङ्कुशाय नमः । ॐ गदायै नमः । ॐ त्रिशूलाय नमः ॥

एवं होमं कृत्वा स्विष्टकृदादिप्रायश्चित्तहोमान्तं च कृत्वा तदनन्तरम् इन्द्रादिनवग्रह-क्षेत्रपालादिभ्यो माषभक्तबलींस्तत्तन्मन्त्रैर्दद्यात्। यथा-

इन्द्राय— इन्द्रः सुरपतिश्चैव वज्रहस्तो महाबलः ।
शतयागाधियो देवस्तस्मै नित्यं नमो नमः ॥१॥

इन्द्राय साङ्गाय सपरिवाराय सशक्तिकाय सायुधाय इमं भाषभक्तबलिं समर्पयामि, भो इन्द्र ! इमं बलिं गृहाण, यजमानस्य आयुःकर्ता, शान्तिकर्ता, तुष्टि-पुष्टि-कल्याणकर्ता, वरदो भव, अनेन बलिदानेन इन्द्रः प्रीयताम् ॥१॥

अथाऽग्निम्- आग्नेयः पुरुषो रक्तः सर्वदेवमयोऽव्ययः ।
धूमकेतुरनाधृष्यस्तस्मै नित्यं नमो नमः ॥२॥

अग्नये साङ्गाय सपरिवाराय सशक्तिकाय सायुधाय इमं माषभक्तबलिं समर्पयामि, भो अग्ने ! इमं बलिं गृहाण, यजमानस्य आयुःकर्ता, शान्तिकर्ता, तुष्टि-पुष्टि- कल्याणकर्ता, वरदो भव, अनेन बलिदानेन अग्निः प्रीयताम् ॥२॥

अथ यमाय- यमश्चोत्पलपत्राक्षः किरीटी दण्डधृक् सदा ।
लोकसाक्षी विशुद्धात्मा तस्मै नित्यं नमो नमः ॥३॥

यमाय साङ्गाय सपरिवाराय सशक्तिकाय सायुधाय इमं माषभक्तबलिं समर्पयामि, भो यम ! इमं बलिं गृहाण, यजमानस्य आयुःकर्ता, शान्तिकर्ता, तुष्टि-पुष्टि-कल्याणकर्ता, वरदो भव, अनेन बलिदानेन यमः प्रीयताम् ॥३॥

अथ निर्ऋतये- निर्ऋतिस्तु पुमान् कृष्णः सर्वरक्षोऽधिपो महान् ।
खड्गहस्तो महासत्त्वस्तस्मै नित्यं नमो नमः ॥४॥

निर्ऋतये साङ्गाय सपरिवाराय सशक्तिकाय सायुधाय इमं माषभक्तबलिं समर्पयामि, भो नृर्ऋते ! इमं बलिं गृहाण, यजमानस्य आयुःकर्ता, शान्तिकर्ता, तुष्टि-पुष्टि-कल्याणकर्ता, वरदो भव, अनेन बलिदानेन निर्ऋतिः प्रीयताम् ॥४॥

अथ वरुणाय- वरुणः सर्वलोकेषु पुरुषो निम्नगाधिपः ।
पाशहस्तो महाबाहुस्तस्मै नित्यं नमो नमः ॥५॥

वरुणाय साङ्गाय सपरिवाराय सशक्तिकाय सायुधाय इमं माषभक्तबलिं समर्पयामि, भो वरुण ! इमं बलिं गृहाण, यजमानस्य आयुःकर्ता, शान्तिकर्ता, तुष्टि-पुष्टि-कल्याणकर्ता, वरदो भव, अनेन बलिदानेन वरुणः प्रीयताम् ॥५॥

अथ वायवे- सर्वप्राणात्मको वायुः सर्वजन्तुष्ववस्थितः ।
ध्वजहस्तो महाप्राणस्तस्मै नित्यं नमो नमः ॥६॥

वायवे साङ्गाय सपरिवाराय सशक्तिकाय सायुधाय इमं माषभक्तबलिं समर्पयामि, भो वायो ! इमं बलिं गृहाण, यजमानस्य आयुःकर्ता, शान्तिकर्ता, तुष्टि-पुष्टि-कल्याणकर्ता, वरदो भव, अनेन बलिदानेन वायुः प्रीयताम् ॥६॥

अथ सोमाय- गौरो यस्तु पुमान् सौम्यः सर्वौषधिसमन्वितः ।
नक्षत्राऽधिपतिः सोमस्तस्मै नित्यं नमो नमः ॥७॥

सोमाय साङ्गाय सपरिवाराय सशक्तिकाय सायुधाय इमं माषभक्तबलिं समर्पयामि, भो सोम ! इमं बलिं गृहाण, यजमानस्य आयुःकर्ता, शान्तिकर्ता, तुष्टि-पुष्टि-कल्याणकर्ता, वरदो भव, अनेन बलिदानेन सोमः प्रीयताम् ॥७॥

अथेशानाय- ईशानः पुरुषः शुक्लः सर्वदेवाऽधिपो महान् ।
शूलहस्तो विरूपाक्षस्तस्मै नित्यं नमो नमः ॥८॥

ईशानाय साङ्गाय सपरिवाराय सशक्तिकाय सायुधाय इमं माषभक्तबलिं समर्पयामि, भो ईशान ! इमं बलिं गृहाण, यजमानस्य आयुःकर्ता, शान्तिकर्ता, तुष्टि-पुष्टि- कल्याणकर्ता, वरदो भव, अनेन बलिदानेन ईशानः प्रीयताम् ॥८॥

अथाऽनन्ताय— योऽसावनन्तरूपेण ब्रह्माण्डं सचराचरम् ।
पुष्पवद् धरायेन्मूर्ध्नि तस्मै नित्यं नमो नमः ॥९॥

अनन्ताय साङ्गाय सपरिवाराय सशक्तिकाय सायुधाय इमं माष-भक्तबलिं समर्पयामि, भो अनन्त ! इमं बलिं गृहाण, यजमानस्य आयुःकर्ता, शांति कर्ता, तुष्टि-पुष्टि-कल्याण कर्ता, वरदो भव, अनेन बलिदानेन अनन्तः प्रीयताम् ॥९॥

अथ ब्रह्मणे- पद्मयोनिश्चतुर्मूर्तिर्वेदाऽऽ वासः पितामहः ।
कमण्डलुधरो ब्रह्मा तस्मै नित्यं नमो नमः ॥१०॥

ब्रह्मणे साङ्गाय सपरिवाराय सशक्तिकाय सायुधाय इमं माषभक्तबलिं समर्पयामि, भो ब्रह्मन् ! इमं बलिं गृहाण, यजमानस्य आयुःकर्ता, शांतिकर्ता, तुष्टि-पुष्टि-कल्याण कर्ता, वरदो भव, अनेन बलिदानेन ब्रह्मा प्रीयताम् ॥१०॥

नवग्रहेभ्यः साङ्गेभ्यः सपरिवारेभ्यः सशक्तिकेभ्यः सायुधेभ्य इमाम् माष-भक्तबलिं समर्पयामि, भो नवग्रहा इमं बलिं गृह्णत, यजमानस्य आयुःकर्तारः,

शांतिकर्तार, तुष्टि-पुष्टि-कल्याण कर्तारः, वरदा भवत, अनेन बलिदानेन नवग्रहाः प्रीयन्ताम्॥ इति दत्त्वा ततः क्षेत्रपालाय बलिं दद्यात्—

सर्वभूताऽधिपाय क्षेत्राधिपतये शाकिनी-डाकिनी- भूत- प्रेत- पिशाचादि-परिवार-सहिताय इमं बलिं समर्पयामि, भो क्षेत्रपाल अमुं बलिं गृहाण, यजमानस्य आयुः-कर्ता, शांतिकर्ता, तुष्टि-पुष्टि-कल्याणकर्ता, वरदो भव, अनेन बलिदानेन क्षेत्रपालः प्रीयताम् ॥ अतः अञ्जलिं बद्ध्वा पठेत्—

बलिं गह्णन्त्विमे देवा आदित्या वसवस्तथा ।
मरुतश्चाऽश्विनौ रुद्राः सुपर्णाः पन्नगाः खगाः ॥
असुरा यातुधानाश्च पिशाचोरगराक्षसाः ।
डाकिन्यो यक्ष-वेताला योगिन्यः पूतनाः शिवाः ॥
जृम्भकाः सिद्ध-गन्धर्वा नागा विद्याधरा नगाः ।
दिक्पाला लोकपालाश्च ये च विघ्नविनाशकाः ॥

जगतां शान्तिकर्तारो ब्रह्माद्यश्च महर्षयः ।
मा विघ्नं मा च मे पापं मा सन्तु परिपन्थिनः ।
सौम्या भवन्तु तृप्ताश्च भूत- प्रेताः सुखावहाः ॥

इति मन्त्रान् पठेत् । अयं बलिः शूद्रेण दुर्बाह्मणेन वा बहिर्नेयः ।

ततो हस्तौ पादौ प्रक्षाल्याऽऽचम्य पूर्णाहुतिं च जुहुयात्, स्रुचिस्रुवेण द्वादशवारमाज्यं गृहीत्वा नारिकेलादिकं च गृहीत्वा- ॐ मूर्धानम्०, पुनस्त्वा०, पूर्णादर्वि०, सप्ततेऽग्ने०, धामन्ते विश्वम्०, मूलमन्त्रम्, नमो देव्यै० इत्यादि मन्त्रान् पठेत् ।

ततो वसोर्धारां हुत्वा प्रणीताविमोकादि कर्मशेषं समाप्य, मूलमन्त्रेण होमदशांशेन दुग्धेन जलेन वा तर्पणं कृत्वा तेनैव मन्त्रेण तद्- दशांशेन मार्जयेत्॥

ततो यजमान आचार्यादीन् वस्त्राद्यैः संपूज्य तेभ्यो गोमिथुनानि हिरण्यं भूमिं शय्यां सप्तधान्यानि च यथासंभवं दद्यात् ॥

तत आचार्याऽऽदयः कलशोदकेन सपत्नीकं सकुटुम्बं यजमानं- 'ॐ सुरास्त्वा० इत्यादि ग्रहमन्त्रैः, देवस्य त्वा० इत्यादि वेदमन्त्रैश्चाऽभिषिञ्चेयुः ॥

ततो यजमानो ग्रहाणामुत्तरपूजां कृत्वाऽऽचार्येण विसर्जने कृते ग्रहपीठदानं कृत्वा देवीं पञ्चोपचारैः सम्पूज्य महाबलिं दद्यात् ॥ तत्र क्षत्रियादिना- अश्व-मेष-छाग-महिषाणाम् अन्यतरो देयः । विप्रेण तु कूष्माण्ड- विल्वेक्षूणां मध्ये कोऽपि देयः॥ स चेत्थम्- देवीं द्रोणपुष्पविल्वाऽऽम्रदल- जाती- चम्पकैः सम्पूज्य कर्ता उदङ्मुखः सन् पूर्वमुखं देवीसम्मुखं वा बलिं गन्धादिनाऽभ्यर्च्य-

पठन्- पशुस्त्वं बलिरूपेण मम भाग्यादुपस्थितः ।
प्रणमामि ततः सर्वरूपिणं बलिरूपिणम् ॥
चण्डिका - प्रीतिदानेन दातुरापद्विनाशनम् ।
चामुण्डा-बलिरूपाय बले तुभ्यं नमोऽस्तु ते ॥
यज्ञार्थे पशवः सृष्टाः स्वयमेव स्वयम्भुना ।
अतस्त्वां घातयाम्यद्य तस्माद् यज्ञे वधोऽवधः ॥

इति बलिमभिमन्त्र्य- 'ॐ ऐं ह्रीं श्रीं'- इति मन्त्रेण तदुपरि पुष्पं क्षिप्त्वा- प्रार्थना-

रसना त्वं चण्डिकायाः सुरलोक-प्रसाधकः ।
त्वद्रक्तं प्राप्य देव्यस्तु प्रसीदन्ति मुदान्विताः ।।

इति संप्रार्थ्य- 'ह्रां ह्रीं खड्ग आं हुं फट्'

इति खड्गं वा अन्यच्छस्त्रं सम्पूज्य- "ॐ कालि कालि केश्वरि लोहदण्डायै नमः"- इति बलिं छेदयित्वा- "ॐ ह्रीं ऐं ह्रीं कौशिकरुधिरेणाऽऽप्यायताम् ।"- इति देव्यै निवेद्य ततो माषपिष्टमयं शत्रुं कृत्वा खड्गेन छेदयित्वा स्कन्दाय विशिखाय च दत्त्वा बलिशेषं रक्षोभ्यो हरेत् । - मन्त्रस्तु- "ॐ ह्रीं स्फुर- स्फुर, कुम्भ- कुम्भ, सुनु-सुनु, गुलु-गुलु, मारय-मारय, विद्रावय विद्रावय, विदारय-विदारय, कम्पय-कम्पय, कम्पातय- कम्पातय, पूरय-पूरय; ॐ ह्रीं ॐ हुं फट् फट् हुं ।।

ततः शेषं बहिर्दद्यात् ।। तत्र मन्त्राः-

"बलिं गृह्णन्त्विमे देवां०" तः "सौम्या भवन्तु तृप्ताश्च भूतप्रेताः सुखावहाः"।।

इति पर्यन्तम् पूर्वोक्ता एव मन्त्राः पठनीयाः।"

ततः स्नात्वा, तिलकं धृत्वा देवान् प्रार्थयेत्—

ॐ "खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा ।
शंखिनी चापिनी बाणभुशुण्डी परिघाऽऽयुधा ।।"
ॐ "शूलेन पाहि नो देवि! पाहि खड्गेन चाऽऽम्बिके ।
घण्टास्वनेन नः पाहि चापज्यानिःस्वनेन च ।।"
ॐ "नमो देव्यै महादेव्यै शिवायै सततं नमः ।
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम् ।।"
ॐ "रूपं देहि यशो देहि, भगं भवति, देहि मे ।
पुत्रान् देहि धनं देहि सर्वान् कामाँश्च देहि मे ।।"
ॐ "महिषघ्नि महामाये चामुण्डे मुण्डमालिनि ।
आयुरारोग्यमैश्वर्यं देहि देवि नमोऽस्तु ते ।।"

इति देवीं सम्प्रार्थ्य-

"गुह्याऽतिगुह्यगोप्त्री त्वं गृहाणाऽस्मत्कृतं जपम् ।
सिद्धिर्भवतु मे देवि ! प्रसादात् तव सुन्दरि ।।"

इति देव्यै जपं (पाठं) निवेद्य, कृतस्य कर्मणः साङ्गता-सिद्ध्यर्थं- कुमारी-ब्राह्मणसुवासिनीः पूजापूर्वकं सम्भोज्य संकल्प्य वा न्यूनातिरिक्तदोष-परिहारार्थं ब्राह्मणेभ्यो भूयसीदक्षिणां दत्त्वा अग्निं सम्पूज्य विभूतिं (भस्म) धृत्वा चन्दनाक्षतपुष्प

हस्तेन- 'गच्छ गच्छ० इत्यग्निं विसृज्य, मूलमून्त्रेण- (ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे) पुष्पेण देवीमुद्वास्य तेनैव षडङ्गं कृत्वा-'

उत्तिष्ठ देवि चामुण्डे शुभां पूजां प्रगृह्य च ।
कुरुष्व मम कल्याणमष्टाभिः शक्तिभिः सह ॥

इति मन्त्रेण विसृज्य आचार्याय दक्षिणां दत्त्वा मन्त्रं पठेत्-

त्रैलोक्य-मातर्देवि त्वं सर्वभूतदयाऽन्विते ।
दानेनाऽनेन सन्तुष्टा सुप्रीता वरदा भव ॥ ततो-

"यस्य स्मृत्या०" "प्रमादात् कुर्वतां कर्म०" इत्यादि जपित्वा 'कर्म्म' ईश्वरार्पणं कृत्वा सुहृद्- युक्तो भुञ्जीत ।

॥ इति नवचण्डी (नवरात्रचण्डी),- शतचण्डी- सहस्रचण्डी-होमविधिः॥

॥ अलं नवरात्र- सप्तशतीचण्डी- पाठविधिः॥

(नवरात्रे नवम्यां यत् क्रियते हवनं जनैः। तदर्थमेकदेवेन संगृहीतो बुधाऽऽज्ञया ॥

॥ इति ॥